55055

BIBLIOTHECA INDICA:


A

Collection of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1087.



शुद्धिकौमुदी ।

ŚUDDHIKAUMUDI.

BY

GOVINDĀNANDA KAVIKAṄKAṆĀCĀRYYA.

EDITED BY

PAṆḌITA KAMALAKṚṢṆA SMṚTIBHŪṢAṆA

FASCICULUS I.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1904.

SCHOOL OF ORIENTAL STUDIES

S. III 5

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Bengal.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO., 46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa. Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III. Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5 ; Vol. II. Fasc. 1–5 @ 1/ each		10	0
Bal Bhatta Fasc. 1 @ /6/ each		0	6
Bandhaya Banta Sutram Fasc. 1 @ /6/ eaeh		0	6
*Bhāmatī, (Text) Fasc 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4		1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa (Text) Fasc 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Çatadusani Fasc 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ..		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1–7, Vol II, Fasc. 1–3 ...		3	12
Çatasāhasrikā Prajnāpāramitā (Text) Part, I. Fasc. 1–7 @ /6/ each ...		2	10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25 ; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 V 1 IV. Fasc. I @ /6/ each.		19	14
Çlockavartika, (English) Fasc. 1–4		3	0
Çrāddha Kṛyā Kaumudī (Text) Fasc. 1–5 @ /6/ each		1	14
*Çrauta Sūtra of Āpastamba. (Text) Fasc. 4–16 @ /6/ each... ...		4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Dana kriyā kaumudī, Fasc 1–2 @ /6/		0	12
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1–6...		2	4
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–6		2	4
Kātantra, (Text) Fasc 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each...		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Vol. , Fasc 1–9 II, Fasc. 1-10 @ /6/ each		7	2
Manuṭīkā Sangraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–7 @ /12 each		5	4
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III Fasc. 1–6 Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityācāra Paddhatiḥ (Text) Fasc. 1–7		2	10
Nityācārapradīpaḥ (Text) Fasc. 1-4		1	8
Nyayabinduṭīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 ; Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

शुद्धिकौमुदी ।

सानन्दं प्रणमन्महेन्द्रमुकुटप्रोतेन्द्रनीलामल-
श्रेणीश्रीकृतचञ्चरीकनिवहव्यासङ्गसम्भावनम् ।
स्वप्रोद्भूतभवो*त्तमाङ्गतटिनीसम्भूतशङ्कावहं
श्रीगोविन्दपदाम्बुजं वितनुतामृद्धिं परामान्तरीम् ॥
आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगथो विविच्य मुनिभिर्मन्वादिभिः संहिताः ।
श्रीमत्तातपदारविन्दविलसद्धूलीभरोद्देशतः
श्रीगोविन्दकविः करोति गहनां शुद्धेरिमां कौमुदीम् ॥

अथ शुद्धिस्वरूपं निरूप्यते ।

तत्र वेदबोधितकर्म्मार्हता शुद्धिः । अर्हता (च) तत्तद्विधि-बोधितत्वं यत्कर्म्मसम्पादनाय येषां पात्रकालादीनां यादृशं विधि-बोधितत्वं तत्कर्म्मणि तेषां सैव शुद्धिरित्यर्थः ।

---

* क पुस्तके—तलोत्तमाङ्ग— ।

नचाक्षते कर्म्माङ्गाचमने सत्यामपि शुद्धौ कर्म्मार्हत्वायोगादव्याप्तिरिति वाच्यम्। अस्ति च तत्रापि कर्म्मार्हत्वं किन्तु उत्तरीयधारणाद्यङ्गान्तराकरण इवाक्षते कर्म्माङ्गाचमनेऽङ्गबाधात् कर्म्मैव तावद्विगुणं भवति (नतु) तत्र नास्ति शुद्धिः, अतएव तदाचमनं कर्म्माङ्गमित्युच्यते।

तत्र तावच्छुद्धिनिरूपणे कर्त्तव्ये प्रथमं तावत्प्रतियोग्यशौचनिरूपणमुखेन अशौचशुद्धिर्निरूप्यते।

तत्र कश्चित्—शान्त्यतिरिक्तप्रयत्नानपनेयत्वे* सति सजातीयसंस्पर्शानर्हत्वापादकत्वमित्यशौचलक्षणमाह। तदयुक्तम्। अतीते अङ्गास्पृश्यत्वे सत्यव्याप्तेः सपिण्डजननकन्याजननादावव्याप्तेश्च।

नापि शान्त्यतिरिक्तप्रयत्नानपनेयत्वे सति कर्म्मानर्हत्वमशौचमिति सद्यःशौचस्थले स्नानापनेयाशौचेऽ†व्याप्तेः।

जानूर्द्ध क्षतजे जाते नित्यकर्म्मापि नाचरेत्।
सूतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने॥
धूमोद्गारे तथा वान्ते नित्यकर्म्माण्यपि त्यजेत्।
जलौकां गूढ़पादञ्च क्रिमिमगण्डूपदादिकम्।
कामाद्वस्तेन संस्पृश्य नित्यकर्म्म च नाचरेत्॥

इति कालिकापुराणे कर्म्मानर्हत्वप्रतिपादनात् रक्तपात-क्षौरकर्म्म

---

* ख पुस्तके प्रयत्नापनयने सत्वे।

† ख पुस्तके—स्नानापनयनाशौचे।

धूमोद्गार-वान्त-जलौकादिस्पर्शेष्वतिव्याप्तेः। ततस्तद्दिने पतितमेकोद्दिष्टं तत्परदिने प्रसज्येत। स्त्रीणां रजोयोगे चातिव्याप्तेः। न च

रात्रिभिर्मासतुल्याभि र्गर्भस्रावे विशुद्धयति।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला॥

इति मनुना*ऽशौचप्रकरणपठितत्वात् स्त्रीरजोयोगेऽप्यशौचत्वमिति वाचम्। लक्ष्यानुरोधेन हि लक्षणं कल्पनीयं न तु लक्षणानुरोधात् लक्ष्यकल्पनमतिप्रसङ्गात्।

न च शास्त्रे लोके वा स्त्रीरजोयोग-रक्तपात-क्षौर-वान्त-जलौका-स्पर्शनादौ चाशुद्धिमात्रेऽशौचपदव्यवहारः क्वापि दृश्यते प्रत्युत—

उदक्याशौचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत्॥

इति याज्ञवल्क्येन भेदनिर्देशं कृत्वा स्त्रीरजोयोगेऽशौचपदप्रयोगो निषिद्धः।

मनुना तु गर्भस्रावशुद्धिप्रसङ्गेण स्त्रीरजोयोगेऽपि शुद्धिरुक्ता न तु तदशौचमन्यथाऽशौचान्तकृत्यान्यपि प्रसज्येरन्।

सर्वं गोत्रमसंस्पृश्यं तत्र स्यात् सूतके सति।
मध्येऽपि सूतके दद्यात् पिण्डान् प्रेतस्य तत्क्षये॥

इति भविष्यपुराणवचनान्मरणान्तरपातवत् रजोयोगमध्येऽपि रजस्वलायाः प्रेतपिण्डदानप्रसङ्गश्च स्यात्। जातरक्तपातवान्तादेरन्नभक्षणेऽशौचन्नभक्षणप्रायश्चित्तप्रसङ्गश्च स्यात्।

किञ्च [एवं* प्रयत्नानपेयाशुद्धिमात्रस्याशौचपदस्य जनन मरणविशेषाशुद्ध्यर्थस्य च सूतकपदस्य द्वयोः सामान्यविशेषतया भिन्नार्थत्वे सति]—

देये पितॄणां श्राद्धे तु अशौचं जायते यदि।
तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते॥

इति (सामान्यस्य) ऋष्यशृङ्गवचनस्य—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च।
प्रेतपिण्डक्रियावर्ज्जं सूतके† विनिवर्त्तते॥

इति विशेषशृङ्गवचनदर्शनात्‡ तदितरपरत्वे प्रेतपिण्डक्रियावर्ज्जमित्यनेन प्रतिप्रसूतस्य मृताहसम्बन्धिनः प्रेतैकोद्दिष्टसांवत्सरिकश्राद्धस्य सूतकमध्ये प्रसक्तिः स्यात्।

अशौचसूतकयोस्तुल्यार्थत्वे हि तुल्यविषयकवचनयोर्विरोधे सत्येकवाक्यतावशात् सूतकान्ते सांवत्सरिकं प्रेतैकोद्दिष्टञ्च ¶सङ्गच्छते नान्यथेति। अतो रजोयोगबाधितं सांवत्सरिकं प्रेतैकोद्दिष्टञ्च—

---

* ख पुस्तके—[ ] चिह्नितांशः पतितः।

† ग पुस्तके—अशौचे विनिवर्त्तते।

‡ ख पुस्तके—( ) तदितरपरत्वे इत्यारभ्य प्रसक्तिः स्यादित्यन्तसन्दर्भस्थाने—दाशाह्निकपिण्डदानस्य सूतकमध्यविधाननियमेन विधानवैफल्यात् प्रेतपिण्डक्रियापदेनोपलक्षितस्य मृताहसम्बन्धिनः प्रेतैकोद्दिष्टसांवत्सरिकश्राद्धस्य सूतके जननमरणाशौचमध्ये निवृत्तिप्रतिषेधात् तन्मध्य एव प्रसक्तिः स्यात् अशुद्धिसामान्यात् सूतकस्य विशेषत्वे वचनयोर्भिन्नविषयतया ऋष्यशृङ्गवचनस्य सूतकेतराशुद्धिविषयत्वात् इति पाठः।

¶ ग पुस्तके—प्रसज्येत।

श्राद्धविघ्ने ससुत्पन्ने मृताहेऽविदिते तथा।
एकादश्यां प्रकुर्व्वीत कृष्णपक्षे विशेषतः॥

इति वचनात् कृष्णैकादश्यामेव कार्य्यं न तु रजोयोगान्ते। क्षतान्ते ग्रहण्यादिरोगान्ते वेति सर्व्वगौड़शिष्टाचारः।

वस्तुतस्तु अशौचशब्दो जननमरणनिबन्धने शुचित्वाभावे योगरूढ़ः सूतकशब्दसमानार्थः।

अतएव

अशौचन्तु प्रवक्ष्यामि मृत्युप्रसवलक्षणम् *।

इति दक्षेणाशौचस्वरूपं निरूपितम्। तस्माज्जननमरणनिबन्धनं वेदबोधितकर्म्मानर्हत्वमशौचमित्यशौचलक्षणम्।

नचाशौचन्नभक्षणे सहरोदनशवस्पर्शादावव्याप्तिरिति वाच्यं अन्नभक्षणादिसहकारेण मरणस्यैव† [कर्म्मानर्हत्वजनकत्वात्। राहुदर्शने तु-ग्रहणे शावमाशौचमिति ब्रह्माण्डपुराणवचनेन पक्वान्नपाकस्थालीत्यागशुद्धिस्नानादीनां शावाशौचकर्म्मणामतिदेश एव न तु तत्राशौचम्। अथवा वेदबोधित] कर्म्मानर्हत्वापादको जननमरणजन्यापूर्व्वविशेषोऽशौचम्।

---

* ख पुस्तके—कारणम्।

† क ग पुस्तकद्वये—[ ] चिह्नितांशः पतितः।

अथाशौचकालो निरूप्यते।

तत्र मनुः—

शुध्येत् विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति॥

अस्यार्थः—मासद्वयाधिकषड्वर्षोपरि सपिण्डमरणे वेदाग्नि-रहितस्य गर्भाधानादिसंस्कारयुक्तस्य ब्राह्मणस्य दशाहमशौचम्।

अत्र च सूर्य्योदयात् पूर्व्वमशौचे जाते पूर्व्वदिनं ग्राह्यम्।

यथा काश्यपः—

रात्रावेव समुत्पन्ने मृते रजसि सूतके।
पूर्व्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः॥

शूद्रस्य तु षड्वर्षोपरि सपिण्डमरणे "शूद्रस्य त्रिंशता शुद्धिरिति देवलवचनात्" त्रिंशद्दिवसात्मकसावनमासाशौचम्।

अग्निहोत्रिणो मन्त्रब्राह्मणात्मकवेदाध्ययनयुक्तस्य एकाह-मशौचम्। श्रौताग्निवेदाध्ययनयोरेकगुणहीनस्य त्र्यहं गुणद्वय-हीनस्य केवलस्मार्त्ताग्नेश्चतुरहः।

यथा दक्षः—

*एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः।
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा॥

---

* ग पुस्तके—एकाहस्तु समाख्यातः।

तथा बृहस्पतिः—

त्रिरात्रेण विशुध्येत योऽग्निवेदसमन्वितः।
पञ्चाहेनाग्निहीनस्तु दशाहाद्ब्राह्मणध्रुवः॥

अत्राग्निपदं स्मार्त्ताग्निपरं वेदपदं मन्त्रब्राह्मणात्मकपरं पञ्चाहेनाग्निहीनस्त्वित्यनेन केवलं मन्त्रात्मकवेदाध्ययनयुक्तस्य पञ्चाहमशौचमुक्तम्।

तत्र ब्राह्मणध्रुवमाह अङ्गिराः—

गर्भाधानादिसंस्कारै र्युक्तश्च नियमव्रतैः।
नाध्यापयति नाधीते विज्ञेयो ब्राह्मणध्रुवः॥

एष चाशौचसङ्कोचोऽध्यापनादितत्तत्कर्म्मार्थमेव न तु सन्ध्यादिनिमित्तम्।

सूतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयते।
होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनापि वा फलैः॥

इति च्छन्दोगपरिशिष्टे सन्ध्यादीनि निषिध्य* होममात्रस्य प्रतिप्रसवात् ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थमित्यादि गोतमादिनानामुनिवचनाच्च।

शुचीननिधनां(श्वा)स्वन्यान् शालाग्नौ हावयेद्द्विजान्।
शुष्कान्नेन फलैर्वापि वैतानं जुहुयात्तथा॥
न स्पृशेयुरिमानन्ये न च तेभ्यः समाहरेत्।
चतुर्थे पञ्चमे चैव संस्पर्शः कथितो बुधैः॥

---

* ख पुस्तके—सन्ध्यादिनिषिद्ध।

इति कूर्म्मपुराणे साग्नेरपि चतुर्थे पञ्चमाहे चाङ्गास्पृश्यत्वनिवृत्ति-कथनाच्च।

ॐअत्रैवाङ्गाशौचमाह सम्वर्त्तः—

चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं बुधैः।
अस्थिसञ्चयनादूर्द्ध्वमङ्गास्पृश्यो विधीयते॥

शूद्रस्य तु शूद्राणां दशमात्परमिति विशेषवचनादस्थिसञ्चयनं तन्निमित्तकश्राद्धमेकादशाहे (एव) कर्त्तव्यम्। अङ्गाशौचे निवृत्ते हि अस्थिसञ्चयनमित्यङ्गाशौचप्राप्तिः।

तथा अशौचकालत्रिभागेणैवाङ्गाशौचमाह देवलः—

अशौचकालाद्विज्ञेयं स्पर्शनन्तु त्रिभागतः।
शूद्र विट्-क्षत्र-विप्राणां यथाशास्त्रप्रचोदितात्॥

---

‡ क ग पुस्तकद्वये—सम्वर्त्तवचनं नोल्लिखितम्।

अथ जननाशौचम् ।

ब्राह्मणस्य वेदाग्निरहितस्य सपिण्डजनने दशाहमशौचं एकाहाद्यशौचञ्च पूर्व्वोक्तगुणाद्यपेक्षया बोद्धव्यम् । शूद्रस्य तु सपिण्डजनने मासाशौचम् ।

तथा मनुः—

जननेऽप्येवमेव स्यात् द्विजानां शुद्धिमिच्छताम् ।

एवमेवेति शुध्येद्विप्रो दशाहेनेत्याद्यतिदेशः ।

अत्र सपिण्डानामङ्गाशौचाभावमाह कूर्म्मपुराणे—

सूतके तु सपिण्डानां संस्पर्शो नैव दुष्यति ।

सूतिकायास्तु दशाहमेव सर्व्ववर्णानामङ्गाशौचमाह प्रचेताः—

सूतिका सर्व्ववर्णानां दशाहेन विशुध्यति ।

ऋतौ च न पृथक्शौचं सर्व्ववर्णेष्वयं विधिः ॥

*पतेः शूद्रा तु संस्पृश्या त्रयोदशभिरेव च ।

इति यमवचनमत्यन्तासच्छूद्रविषयम् ।

पितुः पुमपत्योत्पत्तौ सचेलस्नानानन्तरमेवाङ्गाशौचाभावः ।

तथाचादिपुराणम्—

सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः ।

कृत्वा सचेलं स्नानन्तु शुद्धो भवति तत्क्षणात् ॥

सूतिकास्पर्शे पितुरपि दशाहमस्पृश्यत्वम् ।

---

* ख पुस्तके —गतैः ।

तथा पराशरः—

यदि पत्न्यां प्रसूतायां द्विजः सम्पर्कमिच्छति।
सूतकन्तु भवेत्तस्य* यदि विप्रः षड़ङ्गवित्॥

सूतकमङ्गाशौचम्। सूतिकास्पर्शिनीनां सपत्नीनामपि दशाह-मङ्गाशौचम्।

पराशरः—

अन्याश्च मातरस्तद्वत्तद्गेहं न व्रजन्ति चेत्।
सपिण्डाश्चैव संस्पृश्याः सन्ति सर्व्वेऽपि निश्चयम्॥

तद्वदिति पित्रवद्दशाहमस्पृश्या भवन्तीत्यर्थः, यदि तद्गेहं न व्रजन्ति तदा संस्पृश्या एव तद्गृहगमने हि स्पर्शसम्भावना। कन्योत्पत्तौ पितुः सचेलस्नानमपि नास्ति—

जाते पुत्रे पितुः स्नानं सचेलन्तु विधीयते।
इति सम्वर्त्तवचनात्।

पुत्रोत्पत्तौ ब्राह्मणी-क्षत्रिया-वैश्यानाञ्च विंशतिरात्रोत्तरकालमेव दैवपित्र्यकर्म्माधिकारः कन्योत्पत्तौ मासेनेति।

तथा च पैठीनसिः—

सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्व्वकर्म्माणि कारयेत् मासेन स्त्रीजननीम्।

---

* ग पुस्तके—तस्य।

शूद्रायास्तु सर्व्वदैव मासेन शुद्धिरशौचव्यापनात्।

न चास्मादेव वचनात् जननाशौचस्य ह्रास* इति वाच्यम्॥ अस्य वचनस्य सूतिकागोचरतयाऽशौचह्रद्यागाङ्गायां प्रवृत्तत्वात् तुल्यकालसम्भवत्वेनाशौचसङ्करविषयस्य जननाशौचस्य सपिण्ड-सामान्यविषयत्वेन भिन्नविषयत्वाच्च।

पुत्रजन्मनि श्राद्धमच्छिन्ननाड्यामेव कर्त्तव्यम् स्तन्याभावात् स्वल्पप्राणिनो बालस्य नाशशङ्कया। अशक्त्या च अशौचापगमेऽपि कार्य्यम्।

तथाच विष्णुधर्म्मोत्तरे—

अच्छिन्ननाड्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि।
अशौचापगमे कार्य्यमथवापि नराधिप॥

तथा मार्कण्डेयपुराणम्—

नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयात्मकम्।
पुत्रजन्मनि तत्कार्य्यं जातकर्म्मसमं नरैः॥

तथा ब्रह्मपुराणे—†

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति तदहस्तस्मात् पुण्यं षष्ठञ्च सर्व्वदा॥

आदिपुराणम्—

शौचाशौचं प्रकुर्व्वीरन् शूद्रवद्वर्णसङ्कराः॥

---

* क पुस्तके—कालः।

† ख पुस्तके—ब्रह्मपुराणपदं नास्ति।

शूद्रवदिति मासाशौचातिदेशः। वर्णसङ्कराः अपकृष्टवर्णेनोत्कृष्ट-(वर्ण) स्त्रीषु जनिताः।

मातृवद् वर्णसङ्करा इति वचनं आनुलोम्येन जातवर्णसङ्कर-विषयम्।

अथ षष्ठदिनं प्राप्य विहितषष्ठ्यादिदेवतापूजार्थं नाशौचं सर्व्ववर्णानाम्।

तथा विष्णुधर्म्मे—

सूतिकावासनिलया जन्मदा नाम देवताः।
तासां यागनिमित्तार्थं शुद्धिर्ज्जन्मनि कीर्त्तिता॥

तासां यागनिमित्तार्थमित्यनेन सन्ध्यादिकन्तु न कर्त्तव्य-मित्यायातम्। जन्मनि जन्माशौचमात्रे न तु मरणाशौचान्तरापाते शुद्धिरित्यर्थः। अत्रास्य वचनस्य प्रकृताशौचस्यैवापवादकत्वे प्राप्ते जन्मनीत्युपादानबलात् जन्माशौचान्तरापातेऽपि शुद्धिः।

सूतके तु समुत्पन्ने द्वितीये समुपस्थिते।
द्वितीये नास्ति दोषस्तु प्रथमेनैव शुध्यति॥

इति यमवचनेन सजातीयद्वितीयाशौचस्य दोषाभावप्रतिपाद-नाच्च। शिष्टाचारोऽपीदृश एव।

अथाशौचे विधिनिषेधौ ।

जावालः—

सन्ध्यां पञ्चमहायज्ञान् नैत्यिकं स्मृतिकर्म्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥

नैत्यिकं विधिपूर्व्वकं स्नानमभीष्टदेवतापूजनञ्च तन्मध्ये अशौच-मध्ये ।

कूर्म्मपुराणे—

शुचीननिधनांस्त्वन्यान् शालाग्नौ हावयेद् द्विजान् ।
शुष्कान्नेन फलैर्वापि वैतानं जुहुयात्तथा ॥

शुचीनशौचरहितान् अनिधनान् होमार्थानुकल्पितधनांश्च द्विजान् शुष्कान्नं शक्तवो लाजाश्च ।

छन्दोगपरिशिष्टम्—

होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनापि वा फलैः ।
अकृतं हावयेत् स्मार्त्ते तदभावे कृताकृतम् ॥

कृतादिशब्दान् स एव व्याकरोति—

कृतमोदनशक्त्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तं इति हव्यं त्रिधा बुधैः ॥

शङ्खः—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च ।
प्रेतपिण्डक्रियावर्ज्जं सूतके* विनिवर्त्तते ॥

---

* क पुस्तके—अशौचे ।

होमः काम्यहोमः स्वाध्यायश्चाध्ययनं पित्रकर्म्म अमावस्यादि-श्राद्धम्।

प्रेतपिण्डक्रियापदेन मृताहसम्बन्धिश्राद्धजातीयमुपलक्ष्यते न तु दशाहादिकपिण्डदानं तस्य सूतकमध्ये विधाननियमेन पुनर्विधान-वैफल्यात्।

तच्च मृताहसम्बन्धिजातीयं सपिण्डीकरणान्तषोड़शश्राद्धं सांवत्सरिकमपि ऐकादशाहिकषाण्मासिकानामपि मृताहावधि-विहितत्वेन*तत्सम्बन्धित्वात्†।

न च पर्णनरदाहे कृते साग्नेराद्यश्राद्धस्य दाहावध्यशौचावसान द्वितीयदिनविहितत्वेन मृताहसम्बन्धित्वाभावादप्रसक्तिरिति वाच्यम्।

एकमृताहसम्बन्धित्वेन तज्जातीयतया अन्यत्रापि ग्रहणादिति। वस्तुतस्तु सांवत्सरिकश्राद्धातिरिक्त(?)पार्व्वणविधिकश्राद्धेतरश्राद्धमत्र विवक्षितमिति।

सूतके जनने मरणे चेत्यर्थः। एवञ्च प्रेतश्राद्ध-प्रतिसांवत्सरिक-श्राद्धयोः पर्य्युदासादशौचकालमध्ये करणप्रसक्तौ तदुत्तरकाल-कर्त्तव्यतामाह ऋष्यशृङ्गः—

देये पितॄणां श्राद्धे तु अशौचं जायते यदि।
तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते॥

---

* ख पुस्तके—नासम्बन्धित्वात्।

† ख पुस्तके—इत आरभ्य प्रकृतानुसरणपर्य्यन्तं कतिपयपत्राणि न सन्ति।

शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन॥

देये शङ्खवचनेनानिवर्त्तितेऽवश्यदेये मृताहसम्बन्धिन्यावश्यकश्राद्धे इत्यर्थः। अतः सिद्धमशौचमध्यपतितं षोड़शश्राद्धं सांवत्सरिक-श्राद्धञ्चाशौचान्तद्वितीयदिने प्रशस्तकालोपलक्षिततिथावेव कार्य्यम्।

अतएव श्राद्धविवेके अपाटवाद्यशौचाभ्यामपि पतितमेकोद्दिष्ट-मेकादश्यामशौचान्ते च मलमासपाते न कर्त्तव्यम्। किन्तु मलमासाव्याप्तकृष्णैकादश्यामेवेत्युक्तम्।

अत्र केचित्—

पक्षिण्यशौचे रात्रावेव तत्तिथेर्लाभात् परदिने भिन्नतिथौ विधा-नाभावादकरणप्रसङ्गभियाऽशौचानन्तरश्राद्धयोग्यकालोपलक्षित-तिथेर्व्विवक्षितत्वात् निषिद्धेतरस्यैव योग्यत्वात् रात्रिवन्मलमास-स्यापि निषिद्धत्वात् मलमासोत्तरतिथावेव कार्य्यमित्याहुः। तदयुक्तम्,

परदिने तिथेर्द्वित्रिमुहूर्त्तमात्रव्यापित्वे तन्मध्य एव श्राद्ध-प्रसङ्गात्तस्यापि निषिद्धेतरत्वादिति।

श्राद्धविवेककर्त्तुः पुनरयमाशयः—

या तिथिरित्यत्र तिथिपदेन दिनमुच्यते ततश्च शुचीभूतेन सता यदहोरात्रं प्राप्यते ऽशौचान्तदिनोत्तरदिनमित्यर्थः। तस्मिंश्च दिने मलमासाख्यविघ्ने जाते वक्ष्यमाणलघुहारीतवचनादनन्तर-कृष्णैकादश्यामेवेति। अथवा परदिने तत्तिथेः किञ्चिन्मात्रलाभेन

पच्चिण्याद्यशौचे रात्रावेव तत्तिथेः समाप्तत्वेन वा भिन्नतिथौ विधानाभावादकरणप्रसङ्गभिया अशौचानन्तरप्रशस्तकालोपलक्षिततिथेर्व्विवक्षितत्वात् मध्याह्नापराह्णयोश्च प्रशस्तत्वात् तस्मिंश्च तिथौ मलमासाख्यविघ्ने सत्यनन्तरकृष्णैकादश्यामेव श्राद्धं वक्ष्यमाणवचनादिति।

समयप्रकाशकारस्तु-नवन्या वै कदाचनेति वचनान्मलमासेऽप्यशौचकालीनप्रथमतिथावेव कार्य्यमित्याह।

तन्न समीचीनम्—

तस्मिंश्च प्रकृते मासि कुर्य्याच्छ्राद्धं यथाविधि।
तथैवाभ्युदयं कार्य्यं नित्यमेकं हि सर्व्वदा॥

इति हारीतेन प्रकृतमास्येव श्राद्धविधानात्।

गर्हितः पितृदेवेभ्यः सर्व्वकर्म्मसु तं त्यजेत्।

इति गृह्यपरिशिष्टवचनाच्च।

सपिण्डीकरणादूर्द्धं यत्किञ्चित् श्राद्धिकं भवेत्।
इष्टं वाप्यथवा पूर्त्तं तन्न कुर्य्यान्मलिम्लुचे॥

इति लघुहारीतेन यत्किञ्चिदित्यनेन सर्व्वेषां श्राद्धानां निषेधाच्च। न च

नेहेतात्र विशेषेज्यामन्यत्रावश्यकाद्विधेः।

इति गृह्यपरिशिष्टेनासम्भवत्कालान्तरकाणां कर्म्मणां प्रतिप्रसवात् नवन्या इत्यनेनास्याप्यसम्भवत्कालान्तरकत्वादिति वाच्यम्।

विघ्नपतितश्राद्धस्य कृष्णैकादश्यां विधानेन सम्भवत्कालान्तरकत्वात् नवन्या वै कदाचनेति निषेधस्तु स्वेच्छयाऽन्यतिथ्यनुष्ठान-

विषयः, अन्यथा रक्तादिपातेऽपि रात्रावपि शौचकालीनप्रथमतिथौ श्राद्धप्रसङ्गः स्यादित्यलं बहुना।

अत्राशौचान्तदिने यदि रक्तपातादिना विघ्नः स्यात्तदा—

श्राद्धविघ्ने समुत्पन्ने मृताहेऽविदिते*तथा।
एकादश्यां प्रकुर्व्वीत कृष्णपक्षे विशेषतः॥

इति लघुहारीतवचनादनन्तरकृष्णैकादश्यामेव कार्य्यम्। कपालाधिकरणन्यायेन प्रथमोपस्थितत्वादतिप्रसङ्गभयाद्वा अनन्तरकृष्णैकादश्या एव न्यायोपात्तत्वात्।

तत्रापि यद्यशौचान्तरं स्यात्तदा तदशौचे व्यतीते तु कार्य्यं पूर्व्ववचनाद्विघ्नान्तरे त्वन्यस्यामनन्तरकृष्णैकादश्यामेवेति एतच्च मृताहसम्बन्धिन्यावश्यकश्राद्ध एव न तु काम्यत्रैपक्षिकादौ "नानुकल्पविधिः काम्ये" इति सर्व्वशक्त्यधिकरणे दर्शितत्वात्।

शूद्रस्य तु त्रिंशद्दिवसाशौचमध्ये प्रथममासिकप्राप्तौ तच्छ्राद्धमनन्तरकृष्णैकादश्यामेव कार्य्यं न त्वशौचान्तदिने। आद्यैकोद्दिष्टादिसपिण्डीकरणान्तानां षोड़शश्राद्धानां तदादितदन्तन्यायात् कृताद्यैकोद्दिष्टस्यैव मासिकश्राद्धेऽधिकारादशौचोत्तरकालकर्त्तव्याद्यश्राद्धाकरणकृताधिकाराभावरूपविघ्नेनैव बाधितस्य प्रथममासिकस्याशौचमध्ये प्राप्तयभावेनाशौचबाधितत्वाभावादिति ध्येयम्॥

कृष्णैकादश्यामपि करणाशक्तौ द्वितीयमासिकदिने प्रथम-

---

* ग पुस्तके—मृताहाविदिते।

मासिकस्य विधानाभावादेव प्रसङ्गाभावात् तदादितदन्त-न्यायेनाकृतप्रथममासिकस्य द्वितीयमासिकेऽधिकाराभावात् मासिकद्वयमेव कृष्णैकादश्यामेकत्र कार्य्यमिति प्राचीनविदुषां सम्मतम्।

मासिकं पतितं दृष्ट्वा मासिकेनैव कारयेत्।

इति मूर्खकल्पितवचनं विदुषामुपहसनीयत्वेन हेयमेव॥

अत्र लघुहारीतवचने विशेषतःपदोपादानात् आदित्यसंक्रमणं विशेषेणायनद्वयमितिवत् शुक्लैकादश्यामपि विघ्नपतितमृताहश्राद्धं कृष्णपक्षे तु प्रशस्तमन्यथा तदनर्थकं स्यादिति तीरभुक्तीयाः।

वस्तुतस्तु अविज्ञातमृतेऽमावस्यायां श्रवणदिवसे वा इति प्रचेतोवचनोक्तामावस्याश्रवणदिवसाभ्यामपि कृष्णैकादश्यां विशेषतः श्राद्धं प्रशस्तम्।

अतएव राजमार्त्तण्डे भोजराजः—

श्राद्धविघ्ने समुत्पन्ने मृतस्याविदिते दिने।
अमावस्यां प्रकुर्व्वीत वदन्त्येके मनीषिणः॥ इति॥

न तु शुक्लपक्षात् कृष्णपक्षे विशेषत इत्यर्थः—विधिद्वयकल्पना-गौरवात् वाक्यभेदापत्तेश्च। प्राधान्याद् विशेष्येणैकादशीपदेन सह विशेषणपदसम्बन्धस्य न्याय्यत्वाच्च। शुक्लैकादश्यां पतितश्राद्धप्रसङ्गे सर्व्वदेशीयाचारविरोधाच्च।

कुमारप्रसवेऽच्छिन्नायां नाड्यां यदा पित्राद्युपकारार्थं गुड़ादिद्रव्यं कश्चिदशौची ददाति तदा तत्प्रतिग्रहे न दोषः।

अशौचिनोऽपि तद्दाने नाशौचम्। गुड़ादिद्रव्यञ्च—गुड़-तिल हिरण्य भूमि चतुष्पद धान्य-घृत-वस्त्र तुरग-रथ-च्छत्र-च्छाग-मत्स्य-शयना-सनानि।

आदिपुराणे—

तत्र दद्यात् सुवर्णञ्च भूमिं गां तुरगं रथम्।
छत्रं छागञ्च मत्स्यञ्च शयनञ्चासनं गृहम्॥
जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि॥

कूर्म्मपुराणे—

जाते कुमारे* तदहः कामं कुर्य्यात् प्रतिग्रहम्।
हिरण्य-धान्य-गौ-वासस्तिलान्न-गुड़-सर्पिषाम्॥

अथ लवण-मधु-मांस-पुष्प-फल-शाक-काष्ठ-तृण-जल-दधि-दुग्ध-घृत-तैलौषध्यजिन-शक्तु-लाज-मोदक-तण्डुलादिषु तत्स्वाम्यनुमत्या स्वयं गृह्यमाणेषु नाशौचम्। क्रीतेषु पुष्पेषु अशौचिहस्ताल्लब्धेष्वपि न दोषः।

आदिपुराणे—

लवणं मधु मांसञ्च पुष्प-मूल-फलानि च।
काष्ठं लोष्ट्रं तृणं पर्णं दधि क्षीरं घृतं तथा॥
औषधं तैलमजिनं शुष्कमन्नञ्च नित्यशः।
अशौचिनां गृहाद् ग्राह्यं स्वयं पण्यञ्च मूलजम्॥

---

* ग पुस्तके—दद्यात्।

मूलं मूल्यं तेन जातं क्रीतमित्यर्थः। अशौचे सपिण्डाना-मन्योऽन्यस्यान्नभक्षणे न दोषः।

यमः—

सूतके तु कुलस्यान्नं न दोषं मनुरब्रवीत्॥

अशौचे निवृत्ते त्वशौचकालोत्पन्नपापक्षयार्थं किञ्चिदवश्यं देयम्।

सम्वर्त्तः—

दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवित्।
दानञ्च विधिना देयमशुभात्तारकं हि तत्॥

अथ बालाद्यशौचम् ।

कूर्म्मपुराणे—

अन्तर्दशाहे बालस्य यदि स्यान्मरणं पितुः ।
मातुश्च सूतकं तत् स्यात् पिता त्वस्पृश्य एव च ॥

जननाशौचकालाभ्यन्तरे यदि बालस्य मरणं भवति तदा-मातापित्रोर्जननाशौचापगमेन शुद्धिः, तत् स्वजात्युक्तं जननाशौचं न तु मरणाशौचमित्यर्थः । फलन्त्वशौचसङ्करे ज्ञेयम् ॥

तथाच बृहन्मनुः—

दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्त्तव्यं जन्माशौचं* विधीयते ॥ इति ।

अस्पृश्यश्च यावदशौचं पिताप्यङ्गास्पृश्यत्वयुक्तः स्यात् । मातुरङ्गास्पृश्यत्वं स्थितमेव ।

तथा पराशरः—

अन्तःसूतके चेदोत्थानादाशौचं सूतकवत् ॥

अस्यार्थः-जननाशौचमध्ये यदि बालो म्रियेत तदा आ उत्थानात् अशौचकालपर्य्यन्तं सूतकवदङ्गास्पृश्यत्वयुक्तमशौचमित्यर्थः ।

न च आ उत्थानाद्दशमदिनपर्य्यन्तं मातुरेव सर्व्ववर्णानामङ्गास्पृश्यत्वयुक्तमशौचमन्येषां सद्यःशौचमिति शुद्धिविवेकव्याख्यानं युक्तम् ।

---

* ग पुस्तके—सूत्याशौचम् ।

अन्तर्दशाहे बालस्य यदि स्यान्मरणं पितुः।
मातुश्च सूतकं तत् स्यात् पिता त्वस्पृश्य एव च॥

इति कूर्म्मपुराणवचनविरोधेन तदेकवाक्यतया उत्थानपदस्य स्नाशौचान्तार्थत्वं मातापित्रोः स्वजात्युक्ताशौचस्यैव युक्तत्वात्।

अतः शूद्रसूतिकाया मासाशौचं सिद्धं एतच्च हारलताकार-मृत्युञ्जय-वलभद्रादीनां प्रामाणिकानां सम्मतम्।

एतस्मिन्नेव विषये सपिण्डानामशौचाभावमाह शङ्खः—

बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति।
सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम्॥

अशौचं मरणाशौचं सूतकं जननाशौचम्। किन्त्वत्र स्नानं पाकस्थालीत्यागश्च। क्षत्रविट्शूद्राणामेषैव व्यवस्था विशेषवचनाभावात्। मृतजाते तु विशेषाश्रवणात् सम्पूर्णं जननाशौचमेव सर्व्वेषां सपिण्डानामिति।

तथाच मिताक्षराधृतपारस्करः—

गर्भे यदि विपत्तिः स्याद् दशाहं सूतकं भवेत्॥

अशौचकालादूर्द्ध्वं षण्मासपर्य्यन्तं बालमरणे किञ्चिद्गुणहीनानां सपिण्डानां सद्यःशौचं षण्मासादूर्द्ध्वं द्विवर्षपर्य्यन्तं बालमरणे किञ्चिद्गुणहीनानां सपिण्डानामेकरात्रम्। द्विवर्षादूर्द्ध्वं मासद्वयाधिकषड्वर्षपर्य्यन्तं बालमरणे त्रिरात्रम्। अतःपरं दशरात्रमिति।

याज्ञवल्क्यः—

आदन्तजन्मनः* सद्य आचूड़ान्नैशिकी स्मृता।

त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम्॥

दन्तजन्मादि कालोपलक्षणम्।

अजातदन्तो मासैर्वा मृतः षड़भिर्गतो बहिः।

वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तन्तु काष्ठवत्॥

इति वचने अजातदन्तो वा षड्भिर्मासैर्गतो वा इत्यभिधानात् षण्मासकालपरत्वम्।

तथा चोपनिषद् दन्तजन्म सप्तमे मासीति।

तथा—जनद्विवार्षिके विप्रे मृते शुद्धिस्तु नैशिकी।

इत्यभिधाय—

निवृत्तचूड़के विप्रे त्रिरात्राच्छुद्धिरिष्यते।

इत्यभिधानात् चूड़ाकालस्य तृतीयवर्षोपलक्षकता एतत्साहचर्य्यात् व्रतस्यापि गर्भाष्टमकालोपलक्षकत्वम्।

यथा याज्ञवल्क्यः—

गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनयनमिति।

दशाहादूर्द्धं षण्मासपर्य्यन्तं बालमरणे निर्गुणयोर्मातापित्रोरेकरात्रं षण्मासादूर्द्धं द्विवर्षपर्य्यन्तं बालमरणे मातापित्रोस्त्रिरात्रम्।

तथा कूर्म्मपुराणम्—

अजातदन्त†मरणे पित्रोरेकाहमिष्यते।

---

* क पुस्तके—आदन्तजननात्।

† क ख पुस्तकद्वये—अदन्तजात—।

दन्तजाते त्रिरात्रं स्यात् यदि स्यातां तु निर्गुणौ ॥

अत्यन्तनिर्गुणसपिण्डानामप्येवम्।

कूर्मपुराणे—

अदन्तजन्ममरणं सम्भवेद्यदि सत्तमाः।

एकाहञ्च* सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ॥

पैठीनसिः—

अक्षतचूड़ानां त्रिरात्रम्। सगुणसपिण्डानां तु द्विवर्षपर्य्यन्तं सद्यःशौचम्।

शङ्खलिखितौ—

बाले चातीते सद्यःशौचं सगुणानामाद्विवर्षात्।

सगुणयोस्तु मातापित्रोः षण्मासपर्य्यन्तं सद्यःशौचम्। वर्षद्वयपर्य्यन्तमेकरात्रम्।

पारस्करः—

अद्विवर्षे प्रेते मातापित्रोरशौचमेकरात्रम्।

क्षत्रिय-वैश्ययोर्विशेषमाह अङ्गिराः—

ऊनत्रिवर्षके विप्रे मृते शुद्धिस्तु नैशिकी।

द्व्यहेन क्षत्रिये शुद्धि स्त्रिभिर्वैश्ये मृते तथा ॥

निवृत्तचूड़के विप्रे त्रिरात्राच्छुद्धिरिष्यते।

तथैव क्षत्रिये षड्भिर्वैश्ये नवभिरेव च ॥

एतच्च गर्भाष्टमपर्य्यन्तमतःपरं स्वजात्युक्तं सर्व्वेषाम्।

---

* ग पुस्तके—एकरात्रम्।

यथा ऋष्यशृङ्गः—

यत्र त्रिरात्रं विप्राणामशौचं संप्रदिश्यते।
तत्र शूद्रे द्वादशाहः षण्णव क्षत्रवैश्ययोः॥
अतःपरन्तु सर्व्वेषां स्वजात्युक्तं विनिर्द्दिशेत्॥

शूद्रेत्वयं विशेषः त्रिंशद्रात्रादूर्द्धं षण्मासपर्य्यन्तं बालमरणे त्रिरात्रम्।

तथा त्रयहाशौचानुवृत्तौ शङ्खः—

*अनूढ़ानान्तु कन्यानां तथा वै शूद्रजन्मनाम्॥

अनूढ़ानां कन्यानां वाग्दत्तानामिति स्वाशौचे वक्ष्यामः। शूद्रजन्मनामजातदन्तानामित्यर्थः।

षण्मासादूर्द्धं द्विवर्षपर्य्यन्तं शूद्रमरणे पञ्चाहमशौचं द्विवर्षादूर्द्धं षड्वर्षपर्य्यन्तं द्वादशाहमशौचम्। षड्वर्षोपरि शूद्रमरणे मासाशौचमाह—

अङ्गिराः—

शूद्रे त्रिवर्षान्यूने तु मृते शुद्धिस्तु पञ्चभिः।
अत ऊर्द्धं मृते शूद्रे द्वादशाहो विधीयते॥
षड्वर्षान्तमतीतो यः शूद्रः संम्रियते यदि।
मासिकन्तु भवेच्छौचमित्याङ्गिरसभाषितम्॥

त्रिवर्षो वर्त्तमानतृतीयवर्षस्तस्मादूनो समाप्तद्विवर्ष इत्यर्थः।

---

* ग पुस्तके—मृतानां कन्यकानान्तु।

यच्च—

अनुपनीतो विप्रस्तु राजा चैवाधनुर्ग्रहात्।
अगृहीतप्रतोदस्तु वैश्यः शूद्रस्त्ववस्त्रयुक्॥
म्रियते यत्र तत्र स्यादशौचं चाहमेव च।
द्विजन्मनामयं कालस्त्रयाणान्तु षड़ाब्दिकः॥
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतःपरम्॥

इति ब्रह्मपुराणवचने त्रयाणां द्विजातीनां द्विवर्षोपरि षड़् वर्षपर्य्यन्तं त्रिरात्राभिधानं तद्वेदाग्निमतां सगुणानामेव। अतएव उपनयनात् परमेव धनुःप्रतोदयोर्ग्रहणविधानादुपनयनकालोऽपि षड़्वर्षात्परम् सगुणानां त्रयाणां द्विजातीनां युक्त इति ध्येयम्।

एवं शूद्रस्यापि यत्पञ्चाब्दपर्य्यन्तं त्रिरात्राभिधानं तदपि—

त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः॥

इति याज्ञवल्क्योक्तपञ्चदशाहाशौचि-सच्छूद्रपरमेवेति। सच्छूद्रास्तु श्रद्धया द्विजातिशुश्रुषा-पञ्चमहायज्ञादि शूद्रविहितक्रियावन्तः। एवंविधानां पञ्चदशाहाशौचिनां सच्छूद्राणामपि षोड़शवर्षोपरि अनूढ़भार्य्यशूद्रमरणे मासाशौचमाह शङ्खः—

अनूढ़भार्य्यः शूद्रस्तु षोड़शात् वत्सरात् परम्।
मृत्युं समधिगच्छेत्तु* मासं तस्य च बान्धवाः॥
शुद्धिं समधिगच्छन्ति नात्र कार्य्या विचारणा॥

---

* ग पुस्तके—समवगच्छेत्तु।

न च शूद्रमात्रस्यैव षड्वर्षोपरि ऊढ़भार्य्यमरणे मासाशौचं षोड़शवर्षपर्य्यन्तमनूढ़भार्य्यमरणे द्वादशाहं तदुपरि मासाशौचमिति शङ्खवचनस्यार्थ इति तीरभुक्तीयमतमुपादेयम्।

ऋष्यशृङ्गाङ्गिरोभ्यां षड्वर्षोपरि सामान्येन मासाशौचस्य विहितत्वात्। अस्मादुक्तरीत्या सम्भवति गत्यन्तरे तद्वचनस्य विषयसङ्कोचे प्रमाणाभावाच्च।

अनूढ़भार्य्यविशेषणस्वरसेन षोड़शवत्सरात् पूर्व्वं तन्मरणे द्वादशाहकल्पनया शङ्खवचनस्य स्वार्थहान्यस्वार्थकल्पनादोषप्रसङ्गाच्च इत्यलं बहुना।

वर्षद्वयाभ्यन्तरे कुमारस्य कन्यायाश्च मरणे भूमौ खननं कृत्वा स्थापितव्यं न कदाचित्प्रेतक्रिया अग्निदाहश्च कार्य्यः।

याज्ञवल्क्यः—

जनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः॥

उदकमुपलक्षणं श्राद्धादिकमपि न कार्य्यम्। यदि तु द्विवर्षाभ्यन्तरे मोहादिना दाहः कृतस्तदा मातापित्रोः सपिण्डानाञ्च त्रिरात्रं ब्राह्मणस्य, एकादशाहं क्षत्रियाणां, द्वादशाहं वैश्यानां, विंशतिरात्रं शूद्राणामशौचम्।

तथाचादिपुराणम्—

अनतीतद्विवर्षेषु प्रेतो यत्रापि दह्यते।
अतिमोहाभिभूतैश्च देशधर्म्मेण मार्द्दवात्॥
अशौचं ब्राह्मणानान्तु त्रिरात्रं तत्र विद्यते।
राज्ञामेकादशञ्चैव वैश्यानां द्वादशाहिकम्॥
अपि विंशतिरात्रेण शूद्राणान्तु भवेत् क्रमात्।

अत्र च पिण्डोदकदानं कार्य्यम्—

जातदन्तस्य वा कुर्य्युर्नान्नि वापि कृते सति॥

इति मनुवचनात्।

अथ स्त्र्याशौचम् ।

आदिपुराणम्—

आजन्मनस्तु चूड़ान्तं यत्र कन्या विपद्यते ।
सद्यःशौचं भवेत्तत्र सर्व्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्य्यन्तं यावदेकाहमेव हि ।
अतःपरं प्रवृद्धानां त्रिरात्रमिति निश्चयः ।
वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ॥
पितुर्व्वरस्य च ततो दत्तानां भर्त्तुरेव हि ।
स्वजात्युक्तमशौचं स्यात् सूतके मृतकेऽपि वा ॥

अस्यार्थः—

जननदिवसादर्षद्वयपर्य्यन्तं कन्यामरणे सपिण्डानां सद्यः-शौचं नित्यशः सगुणत्वनिर्गुणत्वेऽपीत्यर्थः, वत्सरद्वयोपरि वाग्-दानपर्य्यन्तं सपिण्डानामेकाहम् अतःपरं अकृतवाग्दानावस्थातः परं प्रवृद्धानां वाग्दानेन प्राप्ताधिकाररूपाणां त्र्यहं अधिकरूपं व्यक्तीकरोति वाक्प्रदान इति वाग्दाने कृतेऽकृतपाणिग्रह-संस्काराणां भर्त्तृपक्षे पितृपक्षे च त्रिरात्रं विवाहेन दत्तानां मरणे भर्त्तृपक्ष एवाशौचं स्वजात्युक्तं नतु पितृकुले इति ।

तथाच विष्णुः—

स्त्रीणां विवाहः संस्कारः संस्कृतासु स्त्रीषु नाशौचं पितृकुले इति ।

एवञ्च—

उत्कृष्टायाभिरूपाय वराय सदृशाय वै।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि॥

इति मनुना-अप्राप्तकालाया अपि विवाहविधानात्। कदाचिद्बालावस्थायां पाणिग्रहणे सति संस्कारानन्तरं पितृकुले अशौचाभावात् भर्तृकुल एव सम्पूर्णाशौचमेवेति ध्येयम्॥

यत्र तु वाग्दानं न स्यात् तत्र विवाहपर्य्यन्तमेकाहमशौचम्। कूर्म्मपुराणे—

स्त्रीणामसंस्कृतानान्तु वाक्प्रदानात् परं सदा।
सपिण्डानां त्रिरात्रं स्यात् संस्कारे भर्तुरेव हि॥
अहस्त्वदत्तकन्यानामशौचं मरणे स्मृतम्॥

याज्ञवल्क्यः—

अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्॥

अतएव—

दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता।
चतुर्थेऽहनि तास्तेषां कुर्व्वीरन् सुसमाहिताः॥

इति वचने दत्तानामूढ़ानां अदत्तानां वाग्दत्तानां चतुर्थेऽहनि पिता अधिकारी श्राद्धं कुर्य्यादिति-श्राद्धविवेके हारलतायाञ्च व्याख्यातम्। अतएव प्रदत्तानां त्रिरात्रमिति केषाञ्चिदज्ञानां हेयमेव।

न च वाग्दानस्य कालपरत्वं दातुरिच्छाधीनत्वेन वाग्दानकालनियमाभावात्। एवञ्च यदा वाग्दत्ता वा दत्ता वा कन्या

कर्म्माधिकारिणी स्यात् तदा त्रिरात्राशौचं कृत्वा चतुर्थेऽहनि पित्रोः कर्म्म कुर्य्यात्।

अकृतवाग्दाना तु एकरात्रमशौचं कृत्वा परेऽहनि माता-पित्रोः कर्म्म-कुर्य्यात्।

तथा ऋष्यशृङ्गः—

अपुत्रस्य तु या पुत्री सापि पिण्डप्रदा भवेत्।
तस्य पिण्डान् दशैतान् वा एकाहेन च निर्व्वपेत्॥

इति हारलताकारः।

कर्म्मानधिकारिण्यास्वदत्ताया वा कन्यायाः पितृमातृमरणे "यस्य यावदशौचं तस्मिन्मृते तस्य तावत्" इति न्यायात् मातृबन्धौ गुरौ-मित्रे इति जावालवचनाच्च गुरुत्वेनैकरात्रमिति।

केचित्तु—

श्वाशौचं त्रिरात्रं स्यान्महागुरुनिपातने।
दुहितृणान्तु दत्तानां सर्व्ववर्णेष्वयं विधिः॥

इति वचनं पठित्वा व्यवस्थापयन्ति। तदमूलं। पाणिग्रहणानन्तरं दत्तायाः पित्रोर्महागुरुत्वाभावात् समूलत्वेऽपि वाग्दत्ताविषय-मिति।

अत्र च—

जननाशौचमध्ये जातमृतायां बालायां सपिण्डवत् पितुरपि सद्यःशौचमाजन्मनस्तु चूड़ान्तमिति वचने आजन्मन इत्यु-पादानादिति केचित्।

प्राचीनास्तु—

आजन्मनस्तु चूड़ान्तं यत्र कन्या विपद्यते ॥

इति वचने आजन्मन इत्यस्य ज्ञातिपरत्वेनैवोपपत्तेः येन केनापि-लिङ्गेन संख्यया कालेन वावश्यकं निर्देशः कर्त्तव्य इति लिङ्गं संख्या कालः स्वतन्त्रमिति न्यायेन अन्तर्दशाहे बालस्य इति कूर्म्म-पुराणे पुंलिङ्गनिर्देशस्याकिञ्चित्करत्वात्—

अन्तः सूतके चेदोत्थानादाशौचं सूतकवदिति पारस्करवचनेन सामान्योपदेशाच्च अशौचमध्ये कन्यामरणे पुत्रमरणवत्पितुरङ्गा-स्पृश्यत्वयुक्तशेषदिनव्यापकमशौचम् । मातुस्तु सर्व्वथैव मासेन स्त्रीजननीमिति पैठीनसिवचनान्मासेनैव शुद्धिः । अन्यथा पितृ-वन्मातुरपि सद्यःशौचं स्यादिति वदन्ति ।

वस्तुतस्तु—पितुर्व्वरस्य चेति वक्ष्यमाणोपसंहारादाजन्मनस्तु चूड़ान्तमित्यपि पितृपरमिति युक्तमुत्पश्यामः ।

मृतजातायान्तु बालायां विशेषाश्रवणात् सर्व्वेषामेव सम्पूर्णन्तु जननाशौचम् ।

निर्गुणस्य सोदरभ्रातुर्विशेषमाह कूर्म्मपुराणे व्यासः—

आदन्तात् सोदरे सद्य आचूड़ादेकरात्रकम् ।
आप्रदानात्त्रिरात्रं स्याद्दशरात्रमतः परम् ॥

अतःपरं पतिकुले विवाहात् परमित्यर्थः । विवाहेन दत्ताया: कन्याया: पितृप्रधानगृहे यदि प्रसवमरणे स्यातां तदा भ्रात्रा-दीनामेकरात्रं मातापित्रोस्त्रिरात्रम् ।

तथाचादिपुराणम्—

दत्ता नारी पितुर्गेहे म्रियते सूयतेऽथवा ।
स्वमशौचं चरेत् सम्यक् पृथक्स्थानव्यवस्थिता ॥
तद्बन्धुवर्गस्त्वेकेन शुध्येत्तु जनकस्त्रिभिः ॥

पृथक्स्थाने व्यवस्थिता पितुरप्रधानगृहे प्रसवे स्वमशौचं भर्त्तृसम्बन्ध्यशौचं नार्य्येव चरेत् नतु पित्रादिः। म्रियत इत्यस्य यथायोग्यमन्वयः।

पितुः प्रधानगृहे तु प्रसवमरणे बन्धुवर्गस्यैकरात्रं पितुस्त्रिरात्रं बन्धुवर्गः सहवासी भ्रातृ-भ्रातृपुत्र-पितृव्यादिः। जनकपदेन जनन्यपि ग्राह्या जनककर्त्तृत्वाविशेषात्। हारलताशुद्धिविवेकयोरप्ययमेव स्वरसः। वाचस्पतिमिश्रोऽपि पृथक्स्थाने स्वं ज्ञातिरेवाचरेत् न पित्रादिरिति व्याचख्यौ। स्वं स्वकुलं भर्त्तृकुलमेवेति कुवेर-वलभद्रौ।

तथाच कल्पतरुलिखितं व्यासवचनम्—

दत्ता नारी पितुर्गेहे प्रधाने सूयते यदा।
म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैः ॥

मनुः—

विवाहितापि चेत् कन्या म्रियते पितृवेश्मनि।
तस्यास्त्रिरात्राच्छुद्धन्ति बान्धवा नात्र संशयः ॥

अत्र स्वाशौचे* आदिपुराणे सर्व्ववर्णेष्विति श्रवणात् शूद्रस्यापि ब्राह्मणतुल्यैव व्यवस्था।

---

* ग पुस्तके—त्रिरहाशौचे।

अथ विदेशस्थाशौचम् ।

बृहस्पतिः—

अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म च ।
अनिर्गते दशाहे तु शेषाहोभिर्विशुद्ध्यति ॥

तथा विष्णुः—

श्रुत्वा देशान्तरस्थो जननमरणे अशौचशेषेण शुद्ध्येत्* ।

जनना शौचकाले व्यतीते यदि श्रूयते तदा सपिण्डानामशौचाभाव एव ।

यथा देवलः—

नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेष्वपि ॥

अतैव पितुः पुत्रजन्मश्रवणे सचेलस्नानमात्रमाह मनुः—

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥

निर्दशं ज्ञातिमरणमित्यशौचाभावपरम् । अशौचकालातिक्रमे संवत्सरमध्ये सपिण्डमरणश्रवणे त्रिरात्रं संवत्सरोपरि तु स्नानमात्रम् ।

तथा मनुः—

अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥

दशाह इति संपूर्णाशौचोपलक्षणम् ।

---

* क पुस्तके श्रुत्वा देशान्तरस्थे—शुद्धिः ।

अत्र तु प्रथमसंवत्सरोपरि पितृमातृमरणश्रवणे एकाहमाह देवलः—

अघाहःसु व्यतीतेषु ज्ञातिश्चेच्छ्रूयते मृतः।
तत्र त्रिरात्रमाशुचं भवेत् संवत्सरान्तरे॥
ऊर्द्धं संवत्सरादाद्यान्बन्धुश्चेच्छ्रूयते मृतः।
भवेदेकाहमेवात्र तच्च संन्यासिनां न तु॥
बन्धुर्माता पिता चैव स्त्रीणां च पतिरेव च॥

आद्यादिति विशेषणात् द्वितीयसंवत्सरोपरि तु स्नानमात्रेण शुद्धिः।

संवत्सरमध्ये सपिण्डमरणश्रवणे चतुःपञ्चाहाशौचिनोः पक्षिणीमाह गोतमः—

श्रुत्वा*चोर्द्धं दशम्याः पक्षिणीं, व्याप्याशौचं कुर्य्यादिति शेषः।

त्र्यहाशौचिनां पक्षिण्यशौचिनाञ्च एकाहमाह-विष्णुः—

अतीते अशौचे संवत्सरान्ते एकरात्रं†। अन्ते मध्य इत्यर्थः।

अत्र कश्चिद्दाग्निनिबन्धनत्र्यहाशौच—ब्राह्मणविषयमेवेदं विष्णुवचनं समानोदकव्याघ्रादिहतादीनान्तु त्र्यहाशौचिना—मशौचबहिःश्रवणेऽपि त्र्यहाशौचमेव विशेषवचनाभावादित्याह।

तदशुद्धं विशिष्टत्र्यहाशौचिपरत्वे प्रमाणाभावात् विनि-

---

* ग पुस्तके—अर्द्धात्।

† क पुस्तके—एकरात्रेण।

गमनाविरहेण विष्णुवचनस्य सकलत्रग्रहाशौचिपरत्वात्। अशौच-बहिःश्रवणे सर्व्वत्रैवाशौचह्रासस्य दर्शनात् समानोदकादि-स्थलेऽपि तथैव न्याय्यत्वाच्च ह्रासं प्रति स्वाशौचदिवातिक्रमस्यैव कारणत्वाच्च।

तथा एकाहाशौचिनां सद्यःशौचमाह गोतमः—

बालदेशान्तरितप्रव्रजितानां सद्यःशौचम्। यत्र तद्दिने मृतो न श्रूयते तद्देशान्तरम्।

विगतन्तु विदेशस्थं शृणुयाद्यो ह्यनिर्द्दशम्।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥

इति मनुवचनादत्र—

शुद्धिविवेकः—

दशाहादूर्द्ध्वं षण्मासपर्य्यन्तं त्रिरात्रं षण्मासादूर्द्ध्वं नवममास-पर्य्यन्तं गोतमोक्तं पक्षिण्यशौचं तदूर्द्ध्वं संवत्सरपर्य्यन्तं विष्णूक्त-मेकाहमिति। तन्मन्दम्—

अथाहःसु व्यतीतेषु* ज्ञातिश्चेच्छ्रूयते मृतः।
तत्र त्रिरात्रमाशुच्यं भवेत्संवत्सरान्तरे॥

इति देवलेन संवत्सरं व्याप्यैव त्रिरात्रविधानात्।

श्रुत्वा चोर्द्ध्वं दशम्याः पक्षिणीमिति गोतमेन-अतीतेऽशौचे एक-रात्रमिति विष्णुना च अशौचानन्तरमेव पक्षिण्येकाहयोर्विधा-

---

* ग पुस्तके—अशौचाहःस्वतीतेषु बन्धु—।

नाच्च, तस्मादुक्तैव हारलताकारादिसम्मता व्यवस्था साधीयसीति। वर्णचतुष्टयस्यैव व्यवस्था विशेषाग्रहणात्।

यथा शङ्खः—

अतीते सूतके स्वे स्वे त्रिरात्रं स्यादशौचकम्।
संवत्सरे व्यतीते तु सद्यःशौचं विधीयते॥

स्वे स्वे इति वीप्सा वर्णचतुष्टयव्याप्त्यर्था। सूतकपदं मरणाशौचपरं नाशौचं प्रसवस्यास्तीति पूर्वोक्तदेवलवचनाच्च।

अथाशौचसङ्करः ।

कूर्म्मपुराणे—

यदि स्यात् सूतके सूतिर्मृतके वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् ॥
मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥

अस्यार्थः—सपिण्डजननाशौचमध्ये अपरस्मिन् सपिण्डजनने पूर्व्वजननाशौचशेषेण शुद्धिः । सपिण्डमरणाशौचद्वयेऽप्येवम् । एतच्च नवमदिनपर्य्यन्तम् । दशमदिने तु समानजातीयसम्पूर्णाशौचद्वयसन्निपाते दशमदिनादधिकेन दिनद्वयेन शुद्धिः । मरणदशाहशेषे जनने सति न दिनद्वयेन किन्तु मरणेनैव शुद्धिरित्याह मरणोत्पत्तियोगेत्विति ।

तथा विष्णुः—

जनने यद्यपरं जननं भवति तदा पूर्व्वेण शुद्धिः । रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण मरणाशौचे ज्ञातिमरणेऽप्येवम् ।

रात्रिशेषे दिनद्वयेनेति अहःशेषे द्विरात्रकमित्यस्य समानार्थम् । अत्र रात्रिशेषशब्दः सर्व्ववर्णानामशौचान्तदिनपरः । रात्रीणामशौचाहोरात्राणां शेषेऽहोरात्र इत्यर्थः । प्रभाते एकादशदिनस्यारुणोदयवेलायां सूर्य्योदयात्पूर्व्वं समानाशौचपाते दशमदिनत्रयेण शुद्धिः । एतच्च संपूर्णाशौचद्वयसन्निपात एव बोद्धव्यम् नत्वसंपूर्णाशौचद्वयेऽपि—

बौधायनसूत्रे—अथ यदि दशरात्राः सन्निपतेपुरादं दशरात्र-

मशौचमानवमाद्दिवसादित्यत्र दशरात्रपदश्रवणादानवमादित्युक्त-त्वाच्च।

एवञ्च जननान्तरे जनने मरणान्तरे अघट्टद्धिमदशौचा-भ्यन्तरे च समानजातीयाशौचे सति रात्रिशेषे दिनद्वयेन प्रभाते च दिनत्रयेण इति प्रवर्त्तत एव।

अत्र नवमदिनाभ्यन्तरे उत्पन्नस्याशौचस्य दशमदिने श्रवणे ऽपि पूर्ब्बेणैव शुद्धिर्नतु दिनद्वयं वर्द्धते दशरात्राः सन्निपतेयुरिति बौधायनवचने यदि स्यात् सूतके सूतिरिति कूर्म्मपुराणवचने चाशौचान्तरोत्पत्तेरेव विहितत्वात् नतु श्रवणस्य श्रवणपरत्वे लक्षणाप्रसङ्गात्।

समानकालव्यापि-सपिण्डजननाशौचसपिण्डमरणाशौचयोः सन्निपाते मरणाशौचेन शुद्धिः।

मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते।

इति कूर्म्मपुराणवचनात्।

अथाघबुद्धिमदशौचम् ।

सपिण्डमरणाशौचकालभागद्वयोपरि पितृमातृमरणं स्त्रियाश्च भर्तृमरणं सपिण्डजनन-स्वकन्याजननयोरशौचकालभागद्वयोपरि स्वपुत्रजननाशौचं भवति तदा तेनैव परभाविनाऽघबुद्धिमदशौचेन शुद्धिः । अघबुद्धिमज्जननमरणसन्निपाते तु सर्व्वथा मरणेनैव शुद्धिः ।

एतत् सर्व्वं व्यक्तमाह आदिपुराणे व्यासः—

आद्यं भागद्वयं यावत् सूतकस्य तु सूतके ।
द्वितीये पतिते चाद्यात् सूतकात् शुद्धिरिष्यते ॥
अत ऊर्द्धं द्वितीयात्तु सूतकाच्च शुचिः स्मृतः ।
एवमेव विचार्य्यं स्यात् मृतके मृतकान्तरे ॥
मृतकस्यान्तरे यत्र सूतकं प्रतिपद्यते ।
सूतकस्यान्तरे वाथ मृतकं यत्र विद्यते ॥
मृतस्यान्ते भवेच्छुद्धिः सर्व्ववर्णेषु नित्यशः ॥

तथाच शङ्खः—

परतः परतः शुद्धिरघबुद्धौ विधीयते ।
स्याच्चेत्पञ्चतमादङ्गः पूर्व्वेणैव विशुध्यति ॥

सपिण्डजननात् स्वकन्याजननाच्च स्वपुत्रजननस्याङ्गास्पृश्यत्व-वत्त्वेनाघबुद्धिमत्त्वम् । तथा सपिण्डमरणात् पितृमातृमरणस्य स्त्रियास्तु पतिमरणस्य तेषां महागुरुत्वेनाघबुद्धिमत्त्वम् । परतः शेषार्द्धेऽघबुद्धिमदाशौचे सति परतः पराशौचादघबुद्धिमत एव

उपदेशात् [*तदभावे बाधनस्यैव बाधितत्वात् यथा युग्मोत्पत्तौ पूर्व्वस्य मरणेऽनुजजन्मनिबन्धनमशौचमव्याहतमिति प्राचीनाचारोऽपीदृश एव।

मृतस्य मातापित्रोस्तु मृतस्यैव बालस्य जननाशौचेनैव शुद्धिः-तयोरेवाङ्गास्पृश्यत्वयुक्तजननाशौचविधानात्। अत्रैव यदि मरणाशौचं स्यात् तदानेनैव मरणाशौचेन शुद्धिः।

मातुश्च सूतकं तत् स्यादिति कूर्म्मपुराणवचनेन—

दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः।
शावाशौचं न कर्त्तव्यं जन्माशौचं विधीयते॥

इति बृहन्मनुवचनेन बालमरणस्य जन्माशौचत्वप्रतिपादनात् मरणाशौचस्याङ्गास्पृश्यत्ववत्त्वेन स्नानशान्त्यादिप्रयत्नापनेयत्वेन च ततोऽपि गुरुत्वाच्च। (?)]

अथ यदि रात्रिशेषे दिनद्वयेनेति बर्द्धितेऽशौचेऽशौचान्तरं स्यात् तदा बर्द्धितेनैव पूर्व्वाशौचेन शुद्धिः, द्वितीयाशौचेन पूर्व्वाशौचस्य बर्द्धितत्वेन गुरुत्वेन—

सूतके च समुत्पन्ने द्वितीये समुपस्थिते।
द्वितीये नास्ति दोषस्तु प्रथमेनैव शुध्यति॥

इति यमवचने द्वितीयाशौचस्य स्नातन्त्र्याभावप्रतिपादनाच्च। अन्यथा प्रकृताशौचान्तत्वाभावात् शय्यादानवृषोत्सर्गादिकं न स्यात्।

---

* क पुस्तके—[ ] चिह्नितांशोऽधिकः।

एवञ्च समानाशौचद्वयसन्निपाते पूर्व्वाशौचस्य शेषार्द्धे मध्याशौचस्य पूर्व्वार्द्धेऽघट्टद्विमदशौचे सति मध्याशौचस्य बाधितत्वेनाल्पकालव्यापित्वात् पूर्व्वाशौचस्यैव बलवत्तया परतः परतः शुद्धिरिति व्यवतिष्ठत एव।

एवञ्च पूर्व्वशौचाज्ञाने तन्मध्यपतितस्य पराशौचस्य ज्ञातस्य शेषेऽतीतपूर्व्वाशौचज्ञाने सति पराशौचेनैव शुद्धिः—अतीतस्य यथाकाले ज्ञानाभावादनिमित्ततया बाधकत्वाभावात्।

अत्र च सङ्करशौचे सर्व्ववर्णेषु नित्यश्च इति आदिपुराणवचनश्रवणात् विशेषवचनाभावाच्च शूद्रस्यापि ब्राह्मणतुल्यैव व्यवस्था।

अथ गर्भस्रावाशौचम् ।

आदिपुराणे—

षण्मासाभ्यन्तरं यावत् गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥
अत ऊर्द्धं स्वजात्युक्तमशौचं तासु विद्यते ।
सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ॥

तासामिति—बहुवचनं वर्णचतुष्टयस्त्रीणां ग्रहणम् । षण्मास-पर्य्यन्तं गर्भस्रावे स्त्रीणामेवाशौचं न पुंसाम् । सप्तमाष्टममासीयगर्भे जातमृते मृतजाते वा स्त्रीणां सम्पूर्णाशौचं सपिण्डानां सद्यःशौचं अत्यन्तनिर्गुणसपिण्डानामेकरात्रं यथेष्टाचरणशीलानां त्रिरात्रम् । तथा कूर्म्मपुराणे—

अर्व्वाक् षण्मासतः स्त्रीणां यदि स्याद् गर्भसंस्रवः ।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम् ॥
अत ऊर्द्धन्तु पतने स्त्रीणां स्याद्दशरात्रकम् ।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः ॥
गर्भस्रु*तावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे ।
यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः† ॥

---

* ग पुस्तके—च्युतौ । मूलपुस्तके—च्युतात् ।
† ग पुस्तके—निर्णयः ।

अत ऊर्द्धं षण्मासादूर्द्धं दशरात्रमिति स्वजात्युक्ताशौचोपलक्षणं सपिण्डानां षण्मासादूर्द्धं सद्यःशौचविधानात् षण्मासात् पूर्व्वमशौचाभाव एव।

जातमृते मृतजाते वा कुलस्य त्रिरात्रमिति हारीतवचनमपि सप्तमाष्टममासीयगर्भपाते यथेष्टाचरणशीलज्ञातिविषयम्।

यथेष्टाचरणशीलस्तु सर्व्वाग्निस्वे सर्व्वविक्रयित्वे सति विहितकर्म्मानुष्ठानशीलः।

यदा तु सप्तमाष्टममासीयो गर्भः पतितो दैववशाज्जीवति तदा सपिण्डानामपि सम्पूर्णाशौचम्। द्वितीयादिदिने मृते तु पूर्व्वोक्तबालाद्यशौचविषयत्वेन मातापित्रोरङ्गास्पृश्यत्वयुक्तं सम्पूर्णाशौचं सपिण्डानान्तु सद्यःशौचमेव।

प्रथमदिने जातमृते तु पितुरपि सद्यःशौचम्—

स्त्रीणान्तु पतितो गर्भः सद्योजातो मृतोऽथवा।
वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तन्तु काष्ठवत्॥
खनित्वा शनकैर्भूमौ सद्यःशौचं विधीयते।

इत्यादिपुराणवचने सद्योजातमृतस्य सद्यःशौचविधानात्। मातुस्तु पूर्व्वोक्तकूर्म्मपुराणवचनात् सम्पूर्णमेव। अत्यन्तनिर्गुणसपिण्डानामेकरात्रं यथेष्टाचरणानां त्रिरात्रमित्यपि प्रथमदिनमृतविषये बोद्धव्यम्।

द्वितीयमासे विशेषमाह मरीचिः—

गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्रयः।
राजन्ये च चतूरात्रं च वैश्ये पञ्चाहमेव च॥

अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता।

अस्यार्थः—गर्भस्रुत्यां यथामासमिति पूर्व्वलिखितादिपुराणवचन समानविषयम्। अचिरे द्वितीयमासीये गर्भस्रुते उत्तमे ब्राह्मणजातौ त्रयो दिवसा अशौचकालः। क्षत्रिये चतुर्दिनं वैश्ये पञ्चदिनं शूद्रस्याष्टौ दिवसाः।

यदत्र मासंख्येयदिवसातिरिक्तमेकरात्रं ब्राह्मणस्य, द्विरात्रं क्षत्रियस्य, त्रिरात्रं वैश्यस्य, षड्रात्रं शूद्रस्येत्युक्तं तद्दैवपित्रकर्म्माधिकारार्थम्। एतदपि द्वितीयमासात् प्रभृति षण्मासपर्य्यन्तं मासंख्यदिनातिरिक्तं यथावर्णमेकरात्रादिकं दैवपित्रकर्म्माधिकारार्थं बोद्धव्यम्।

प्रथममासे तु गर्भनिर्णयाभावेन रजोऽविशेषत्वात् रजस्वलावत् शुद्धिः।

अतएव हारीतः—

गर्भपतने स्त्रीणां त्रिरात्रं साधीयो रजोऽविशेषत्वादिति।

अथ पतितगर्भस्य प्रतिपत्तिमाह आदिपुराणे—

स्त्रीणां तु पतितो गर्भः सद्योजातो मृतोऽथवा।
अजातदन्तो मासैर्व्वा मृतः षड्भिर्गतैर्ब्बहिः॥
वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तन्तु काष्ठवत्।
खनित्वा शनकैर्भूमौ सद्यःशौचं विधीयते॥

स्त्रीणां सप्तमाष्टममासीयः पतितो गर्भो मृतजातो जीवजातो वा सद्य एव मृतः-अनुत्पन्नदन्तो वा षण्मासाभ्यन्तरे मृतः

षण्मासैर्गतैर्व्वा सप्तममासादौ मृतस्तं भूमौ निक्षिप्य सद्यःशौचं कर्त्तव्यमिति।

एतच्च षण्मासात् परं सद्यःशौचं सगुणानामेवेति बालाद्यशौचे उक्तमेव।

अत्र प्रसङ्गात् रजस्वलाशुद्धिर्निरूप्यते।

रजस्वला चोपरते रजसि चतुर्थदिने स्वामिनिमित्तं शुद्धा दैवपित्र्यकर्म्मणि तु पञ्चमदिन एव।

मनुः—

रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला।

साध्वी शुद्धा स्यादित्यर्थः। चतुर्थदिने तु स्नानम्॥

हारीतः—

हस्तेऽश्नती मृन्मये वा निशायां क्षितिशायिनी।

रजस्वला चतुर्थेऽह्नि स्नात्वा शुद्धिमवाप्नुयात्॥

उपरत इति विशेषणात् रजःस्थितौ चतुर्थदिनेऽपि न शुद्धेत्यर्थः।

अङ्गिराः—

साध्व्याचारा न तावत् स्त्री रजो यावत् प्रवर्त्तते।

वृत्ते रजसि साध्वी *सा गृहकर्म्मणि चेन्द्रिये॥

वृत्ते अतीते ऐन्द्रिये मैथुने।

शातातपः—

भर्त्तुः शुद्धा चतुर्थेऽह्नि अशुद्धा दैवपैत्र्ययोः।

दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति॥

---

* ग पुस्तके—गम्या स्त्री।

भर्त्तुर्दृष्टार्थकर्म्मणि स्पर्शने च शुद्धा न तु मैथुने।

तासामाद्याश्चतस्रश्च निन्दितैकादशी च या।

इति मनुवचनेन निषिद्धत्वात्।

तथा मिताक्षरालिखितमत्रिवचनम्—

रजस्वला यदि स्नाता पुनरेव रजस्वला।

अष्टादशदिनादर्व्वागशुचित्वं न विद्यते॥

एकोनविंशतेरर्व्वागेकाहं स्यात्ततो द्व्यहम्।

विंशप्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत्॥ इति॥

वसिष्ठः—

रजस्वला त्रिरात्रमधःशयीत नाप्सु स्नायात् न दिवा स्वप्यात् नाग्निं स्पृशेत् नापि जघन्यजं न मांसमश्नीयात् न ग्रहं निरीक्षेत न हसेत् न किञ्चिदाचरेत्।

अप्सु निमज्जेत्यर्थः। जघन्यजः शूद्रः, ग्रहः सूर्य्यादिः। न किञ्चित् दैवकार्य्यं लेपनादिगृहकार्य्यमपि सर्व्वं नाचरेदित्यर्थः।

अङ्गिराः—

आतुरा तु यदा नारी रजसा मलिनीकृता।

चतुर्थेऽहनि संप्राप्ते ताञ्च स्पृष्ट्वा ह्यनातुरा॥

दशैकादशवारान् वा स्नानं कुर्य्यात् पुनःपुनः।

एवं तस्या विशुद्धिः स्यात् परिवर्त्तितवाससः॥

रजस्वला तु या नारी अन्योन्यमुपसंस्पृशेत्।

सवर्णे त्वेकरात्रेण द्विरात्रमसवर्णके॥

उत्तमवर्णस्पर्शे तु स्नानमात्रम्।

विष्णुः—

अधिकवर्णां रजस्वलां स्पृष्ट्वा स्नात्वाऽश्नीयात्।

मनुः—

रजस्वला तु संस्पृष्टा स्नाहिजम्बूकवायसैः।
निराहारा भवेत्तावत् यावत् कालेन शुध्यति॥

बृहस्पतिः—

पतितान्त्यश्वपाकेन संस्पृष्टा तु रजस्वला।
प्रथमेऽह्नि त्रिरात्रं स्याद् द्वितीये द्यहमाचरेत्॥
अहोरात्रं तृतीये तु चतुर्थे नक्तमेव च॥

अथ सपिण्डाद्यशौचम्।

बृहस्पतिः—

दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ॥

त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः ॥

प्रेतसूतके इति मरणे जनने चेत्यर्थः—

एतच्च याट्शवयस्कसपिण्डमरणे सम्पूर्णाशौचं ताट्शवयस्कस्यैव समानोदकस्य मरणे त्रिरात्रं विधीयते तेन बालमरणाशौचं समानोदकानां नास्ति विशेषवचनाभावात्। तथा व्याघ्रादिहतेषु समानोदकानामपि त्रिरात्रं अविशेषेण बृहस्पतिना त्रिरात्राभिधानात् यथा—व्याघ्रादिहतानां मातुलादीनां पत्निष्याद्यशौचमेव विशेषाभावादिति।

सपिण्डतोक्ता मत्स्यपुराणे—

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।

पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम् ॥

लेपभाज इत्यादिना हेतुमुपन्यस्य फलमाह तेषामिति तेषां सपिण्डानां पिण्डलेपदस्य पिण्डलेपभागिनां ससन्ततीनां षण्णाञ्च सापिण्ड्यं सप्तपौरुषं परस्परनिष्पाद्यतया सप्तसु पुरुषेष्ववस्थितम्। अत्रैकपिण्डस्वधानामिति वक्ष्यमाणसुमन्तुवचनात् ससन्ततित्वलाभः।

अयमर्थः—पिण्डः पिण्डलेपसम्बन्धः तेन सह वर्त्तमानाः

सपिण्डाः। स च सम्बन्धः साक्षात् परम्परयापि। तेषां सप्तानां पिण्डलेपदातृत्वभोक्तृत्वसम्बन्धः साक्षात् सन्ततीनान्तु पिण्ड-लेपयोस्तुल्यसम्प्रदानकत्वसम्बन्धः परम्परयेति। लेपसम्बन्धात् पिण्डोऽपि पार्व्वणपिण्ड एव सोऽपि स्वगोत्रजानामेव न तु मातामहादीनां पित्राद्या इत्यभिधानात् लेपसाहचर्य्याच्च।

अतएव शङ्खलिखितौ—

सपिण्डता तु सर्व्वेषां गोत्रतः सप्तपौरुषी।

पिण्डञ्चोदकदानञ्च शौचं चैव तदानुगम्॥

सर्व्वेषां वर्णानां गोत्रतो गोत्रैक्ये सतीत्यर्थः, तान् पुरुषान् आ समन्तादनुगच्छतीत्यर्थः।

एवञ्च वृद्धप्रपितामहपितामहस्य यो भ्राता तेन तत्सन्ततिभिश्च सह सापिण्ड्याभावः पिण्डलेपसम्बन्धाभावादिति।

ततश्च—गोत्रैक्ये सति साक्षात्परम्परया वा पार्व्वणपिण्डलेप-सम्बन्धाश्रयत्वं सपिण्डलक्षणं सम्पन्नम्। *अथवा गोत्रैक्ये सति तुल्यसम्प्रदानकपार्व्वणपिण्डलेपसम्बन्धाश्रयत्वं सापिण्ड्यम्।

तुल्यसम्प्रदानकानां पिण्डलेपानां सम्बन्धस्याश्रयास्त्रयो भवन्ति सम्प्रदानं दाता यदपेक्षया सम्प्रदानस्य तुल्यता सोऽपीति।

अत्र भ्रातुरभावे तुल्यसम्प्रदानकपितामहादिपिण्डसम्बन्धा-पेक्षया पितापि सपिण्डो भवतीति। सपिण्डकाणां बालादीनान्तु योग्यतया सापिण्ड्यं योग्यता च तादृशपिण्डलेपसम्बन्धाश्रयत्वेन वेदबोधितत्वमिति।

---

* मूलपुस्तके—अथवाकल्पोक्तलक्षणं नोल्लिखितम्।

एवञ्च सप्तपौरुषमिति यदुक्तं तदुपलक्षणं पित्रादीनां षट्-पुरुषाणां मध्ये एकस्य जीवित्वे पतितप्रव्रजितत्वे वा पार्व्वणवृद्धि-श्राद्धयोः पिण्डलेपसम्बन्धादष्टमपुरुषपर्य्यन्तं सापिण्ड्यं मन्तव्यम्। द्वयोर्जीवित्वे पतितप्रव्रजितत्वे वा नवमपुरुषपर्य्यन्तं सापिण्ड्यम्। तथा पितृपितामहप्रपितामहानां त्रयाणां जीवित्वेऽपि नवम-पुरुषपर्य्यन्तमेव न तु दशमस्य पितरि पितामहे प्रपितामहे च जीवति नैव कुर्य्यादिति विष्णुना श्राद्धनिषेधात्तस्य लेपभोक्तृत्वा-भावात् किन्तु त्रयाणां मध्ये एकस्य भाविनि मरणे पश्चान्नवमस्य लेपभोक्तृत्वयोग्यतासद्भावान्नवमपर्य्यन्तमेवेति।

यदा तु पित्रादीनां षण्णां मध्ये त्रयः पतितप्रव्रजिता अक्र-मेण जीवन्तो भवन्ति तदा दशमपुरुषपर्य्यन्तं सापिण्ड्यं तस्य लेप-सम्बन्धाश्रयत्वात्।

एवञ्च—चतुःपञ्चादीनां पतितप्रव्रजितत्वे दशमादूर्द्धं पुरु-षेष्वपि सापिण्ड्यप्रसक्तौ तन्निषेधमाह सुमन्तुः—

ब्राह्मणानामेकपिण्डस्वधानामादशमात् सपिण्डताविच्छित्ति र्भवति।

अस्यार्थः—ब्राह्मणानामित्युपलक्षणं एकस्य पिण्डेषु पिण्डलेपेषु स्वधासम्बन्धो दानसम्बन्धो येषां तेषां स्वमादाय दशमपुरुष-मवधिं कृत्वा तत्पुरुषेषु सपिण्डताधर्म्मविच्छेदः तेषु सपिण्डता नास्तीत्यर्थः किन्तु तमादाय तत्परेष्वेव सपिण्डतेति दशम-पुरुषपर्य्यन्तमेव पिण्डलेपभागित्वं तत्पूर्व्वेषान्तु तन्नास्तीति दर्शितम्। एवञ्च लेपभाजश्चतुर्थाद्या इत्युपलक्षणं मन्तव्यम्।

यत्तु—

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावश्च जन्मनाम्नोरवेदने॥

इति मनुवचनम्।

तस्यायमर्थः—आत्मानं विहाय सप्तमे आत्मनोऽष्टम इति। लेपभागिभ्य ऊर्द्धं यावदमुकनाम्नोऽस्माकं पुरुषादयं जात इति विशेषतः सामान्यतो वा अयमस्मत्कुले जात इति स्मर्य्यते तावत् समानोदकता। जन्मनाम्नोरवेदने अज्ञाने तु समानोदकभावो निवर्त्तते निवृत्तसमानोदकभावास्तु केवलं गोत्रजाः।

तथा ब्रह्मपुराणे—

सर्व्वेषामेव वर्णानां विज्ञेया सप्तपौरुषी।
सपिण्डता ततः पश्चात् समानोदकधर्म्मता॥
ततः कालवशात्तत्र विस्मृतैर्जन्मनामभिः।
समानोदकसंज्ञाऽपि तावन्मात्रा विनश्यति॥

जढ़ानान्तु पतिवत् सापिण्ड्यं पतिकुल एव—

एकत्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः।

इति हारलतादिवचनात् सपिण्डीकरणे पार्व्वणपिण्डलेपसङ्गावाच्च। पितृकुलेषु सपिण्डतानिवृत्तिरसगोत्रत्वादिति।

कन्यानान्तु त्रैपुरुषिकं सापिण्ड्यमाहादिपुराणे—

सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी॥

सपिण्डने पार्व्वणपिण्डलेपदातृत्वयोग्यतया सत्यपि सप्तपौरुषिके सापिण्ड्ये वचनात् पुरुषत्रयादूर्द्धं सपिण्डकार्य्यकरत्वं नास्तीति।

वसिष्ठः—

सपिण्डता तु सप्तमपुरुषं स्याद् विज्ञायते।
अप्रत्तानां स्त्रीणां त्रिपौरुषम्॥

अप्रत्तानामविवाहितानां तेन पितृपितामहप्रपितामहेभ्य ऊर्द्धं सापिण्ड्यकार्य्याभावात् कन्याया जनने मरणे च सपिण्डोक्तमशौचं नास्ति एवं तेषामपि जननमरणे न कन्यायाः सपिण्डोक्तमशौचं एवं कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिश्च सह सापिण्ड्यकार्य्याभावात् समानोदककार्य्यम्।

एवमधस्तनपुरुषत्रय एव सापिण्ड्यात् भ्रातुः प्रपौत्रादधोजातानां समानोदककार्य्यमेवेति ध्येयम्।

यत्तु—

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्।
प्रत्तानां भर्त्तृसापिण्ड्यं प्राह देवः पितामहः॥

इति रुद्रधरेण लिखितं तत्रापि "सापिण्ड्यन्तु त्रिपौरुषं" इत्येव पाठः प्रागुक्तादिपुराणादिवचनैकवाक्यतावशात्। अन्यथा पूर्व्वार्द्धं विफलं स्यात् पुत्रादीनामपि तथात्वात्।

तथापि सप्तपौरुषमिति पाठे यद्याग्रहस्तदा यासां पतितप्रव्रजितास्त्रयः पित्रादयस्तद्विषयं वचनमिदं मन्तव्यम्।

अथ प्रकृतमनुसरामः ।

कूर्म्मपुराणे—

मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ।
एकोदकानां मरणे सूतकं चैतदेव हि ॥

पितृभगिनीसुत-मातृभगिनीसुत-भागिनेयेषु मृतेषु पक्षिण्य-शौचम् ।

तथा व्यासः—

पक्षिणी योनिसम्बन्धे बान्धवेषु मृतेषु च* ।
एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणि ॥

आगामिदिवायुक्तवर्त्तमानाहोरात्रं पक्षिणी । गुरुरत्रोपाध्यायो वेदाङ्गव्याख्याता तस्मिन् मृते शिष्यस्यैकरात्रम् ।

स्वगृहे श्वश्रूश्वशुरयोर्मरणे त्रिरात्रम् ।

स्वगृहमधिकृत्य कूर्म्मपुराणे—

त्रिरात्रं श्वश्रूमरणे श्वशुरे तावदेव हि ॥
भिन्नस्थानमृते त्वेकरात्रम् ।

विष्णुः—

आचार्य्य-पत्नी-पुत्रोपाध्यायमातुलश्वश्रूश्वशुर्य्यसहाध्यायि शिष्येष्वतीतेष्वेकरात्रेण ।

---

* ग पुस्तके—तथैवच ।

उपनीय साङ्गवेदाध्यापक आचार्य्यस्तस्य पत्न्यां पुत्रे च मृते श्वशुर्य्ये श्यालके शिष्यो वेदैकदेश-वेदाङ्गाध्येता। मातृष्वसृ-पितृष्वसृमरणे एकरात्रं तत्समानत्वात् तयोः पत्युश्चैकरात्रम्।

दौहित्रे मृते त्रिरात्रं श्रोत्रिये विद्याचारसम्पन्ने भिन्नकुलजे एकवासे मृते त्रिरात्रम्।

तथा यमः—

मातुले पक्षिणी ज्ञेया तत्पुत्रे चैकरात्रकम्।
दौहित्रे च त्रिरात्रं स्यात् श्रोत्रिये स्वगृहे मृते॥

मनुः—

मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च।
शिष्योऽत्र अध्यापितसकलवेदः।

यत्तु—

गुरुः करोति शिष्याणां पिण्डनिर्व्वपणं सदा।
कृत्वा तत् पैतृकं शौचं स्वजातिविहितञ्च यत्॥

इति ब्रह्मपुराणवचनं तत् सकलकर्म्माधिकारिगुरुविषयम्।

श्यालके एकरात्रमाह अङ्गिराः—

एकरात्रमशौचं हि श्यालके च तथाविदम्।
जामातरि मृते चैकरात्रं यस्मिन्मृते च तथा॥

यस्य यावद्यस्मिन् मृते तस्य तावदशौचमिति न्यायेन श्वशुर-तुल्यत्वावगमात्। एवञ्च पितृष्वसृ-मातृष्वसृ-मातुलेषु मातुः सपत्न-भ्रातरि च उपाध्याये जामातरि स्वगृहे मृते त्रिरात्रम्।

कूर्म्मपुराणे—

त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च ॥

तथाच एकरात्राशौचिनां पक्षिण्यशौचिनाञ्च प्रधानगृहमरणे त्रिरात्रमाह भविष्येऽपि—

मातामहे तथातीते चैकरात्राद्यशौचिनाम् ।
मरणं स्याद्यदा गेहे प्रधाने च त्रयहं चरेत् ॥

मनुः—

श्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥

श्रोत्रिये असम्बन्धिब्राह्मणे स्वगृहे मृते इत्यर्थः । अनूचाने साङ्गवेदाध्येतरि एकग्रामस्थे एकरात्रम् । अथवायस्य राज्ञोऽधिकारे वसतिः तस्मिन्नश्रोत्रिये मृते उपाध्यायपुत्रपत्न्योश्च मरणे सज्योतिरशौचम् । सज्योतिस्तु दिवा चेन्मरणं दिवामात्रं रात्रौ चेद्रात्रिमात्रम् ।

आदिपुराणे—

प्रेते राजनि *सज्योति र्यस्य स्याद्विषये स्थितिः ।
उपाध्यायसुते चैव तत्पत्न्यां चैतदेव हि ॥

श्रोत्रियनृपे त्वेकरात्रं—जावालः—

मातृबन्धौ गुरौ मित्रे मण्डलाधिपतावहः ॥

याज्ञवल्क्यः—

गुर्व्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ।
†निवासराजनि प्रेते तदहः शुद्धिकारणम् ॥

---

* ग पुस्तके—सद्यस्तु ।

† ग पुस्तके—अनौरसेषु पुत्रेषु भार्य्यासन्यगतासु च । इत्यधिकः पाठः ।

अनूचानः साङ्गवेदाध्येतमात्रः श्रोत्रियस्तु वेदाध्यापको दशकर्म्म-संस्कृतः एतयोरेकग्रामस्थयोरिति पूर्व्वमुक्तम्। सजातीयानौरसपुत्राणां मरणे सङ्गृहीताया भार्य्यायाः सजातीयापकृष्टजातीयायाः प्रसवमरणे च त्रिरात्रम्।

उत्कृष्टजातीयायास्तु स्त्रिया अपकृष्टजातिगमने महापातकित्वेनाशौचाभावः सजातीयोत्कृष्टजातीयान्यपुरुषसङ्गतायाः भार्य्यायाः प्रसवमरणे च आचार्य्यमरणे च त्रिरात्रम्। य उपनीय साङ्गवेदमध्यापयति स आचार्य्यः।

त्रिरात्रानुवृत्तौ विष्णुपुराणम्—

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च।
परपूर्व्वासु भार्य्यासु प्रसूतासु मृतासु च॥

तथा हारीतः—

परपूर्व्वासु भार्य्यासु पुत्रेषु कृतकेषु च।
त्रिरात्रं स्यात्तथाचार्य्ये भार्य्यास्वन्यगतासु च॥
आचार्य्यपुत्रपत्न्याञ्च* अहोरात्रमुदाहृतम्॥

शिष्ये सतीर्थे त्रिरात्रमिति बौधायनवचनात् शिष्यमरणे गुरोस्त्रिरात्रं शिष्योऽत्र य उपनीय साङ्गवेदमध्यापितः। वेदसहाध्यायि-वेदाङ्गसहाध्यायि-शिष्ययोरेकस्मिन् मृतेऽपरस्यैकरात्रञ्च। प्रथममन्यस्य दत्ता विवाहितैनैव जनितपुत्रा पुत्रसहिता यदान्यमाश्रिता अन्येनापि जनितपुत्रा तदा द्वयोरपि पुत्रयोः प्रसवमरणे च

* गपुस्तके—आचार्य्यपुत्रे।

द्वितीयपुत्रपितुस्त्रिरात्रमशौचं तत्सपिण्डानामेकरात्रम्। भिन्न-पितृकयोस्तु द्वयोरेकमातृजातयोः प्रसवे मरणे च मातृजात्युक्त-मशौचम्।

तथाचादिपुराणे—

आदावन्यस्य दत्तायां कदाचित् पुत्रयोर्द्वयोः।
पितुस्तत्र त्रिरात्रं स्यादेकरात्रं सपिण्डिनाम्॥
एकमाता द्वयोर्यत्र पितरौ द्वौ च कुत्रचित्।
तयोः स्यात् सूतकादैक्यं मृतकाच्च परस्परम्॥

पुष्पविवाहितायास्तु प्रसवे मरणे च सम्पूर्णाशौचं पैशाचरूप-विहितविवाहितत्वात्।

तथाच—

पैशाचः कन्यकाच्छलादिति॥

अत्यन्तस्निग्धे भिन्नकुलजेऽपि मृते एकरात्रम्। मातृबन्धौ गुरौ मित्र इति जावालवचनात्।

मातुर्मातुःस्वसुः पुत्रा मातुः पितुःस्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥

तुल्यन्यायात् पितृबन्धुष्वप्येकरात्रम्।

पितुर्मातुःस्वसुः पुत्राः पितुः पितुःस्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेया पितृबान्धवाः॥

अथ स्नेहेन वा सपिण्डद्विजदहनवहने अशौचिगृहे शयनाद्यकरणे एकरात्रम्। अशौचिगृहवासे अन्नभक्षणरहितस्य दहन-वहनकर्त्तु-

स्त्रिरात्रमशौचम्। मातुराप्तबान्धवानां मातुलादीनां दहनवहने अशौचिगृहवासाभावेऽपि त्रिरात्रम्। दहनवहनाभावेऽपि कामतः सकृदशौचान्नभक्षणे अशौचिजात्युक्तमेवाशौचम्।

मनुः—

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्॥
यद्यन्नमत्ति तेषान्तु दशाहेनैव शुध्यति।
अनदन्नन्नमक्लैव न चेत्तस्मिन् गृहे वसेत्॥

बन्धुवत् स्नेहेनेत्यर्थः। अदृष्टबुद्ध्या तु स्नानमात्रं वक्ष्यते। गृहवासाभावे एकरात्रविधानात् विशुध्यति त्रिरात्रेणेति गृहवासे बोद्धव्यम्।

एवमूढ़ाया दुहितुः स्नेहेन दहनवहनादिकारिणः पितुरप्येकरात्राशौचमिति ध्येयम्।

कूर्मपुराणे—

यस्तेषामन्नमश्नाति सकृदेवापि कामतः।
तदशौचे निवृत्तेऽसौ स्नानं कृत्वा विशुध्यति॥

आपदि तु वहनादिकं कृत्वा कामतोऽशौचान्नभक्षणे त्रिरात्रमाह कूर्मपुराणे—

यद्यन्नमत्ति तेषान्तु त्रिरात्रेण ततः शुचिः। इति।

अनापद्यापदि वाऽकामतोऽशौचान्नभक्षणे यावदश्नाति तावदेवाशौचम्।

अङ्गिराः—

प्रेतान्नमसपिण्डस्य यावदश्नात्यकामतः।
तावन्त्यहान्यशौचं स्यादपिण्डानां कथञ्चन॥

अपिण्डानामसपिण्डानाम्।

कूर्म्मपुराणे—

यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः।
तावन्त्यहान्यशौचं स्यात् प्रायश्चित्तं ततःपरम्॥

एवञ्चोत्कृष्टजातेरशौचिनो यावदन्नं कामतो भुङ्क्ते तावदेवाशौचं अकामतो दोषाभाव इति ध्येयम्।

नित्यान्नदायिनां सङ्कल्पान्नदायिनाञ्चामान्नभक्षणे न दोषः। पक्वान्नभक्षणे तु त्रिरात्रमशौचम्। दुग्धपानञ्च त्रिरात्रं प्रायश्चित्तम्।

कूर्म्मपुराणे—

अन्नसत्रप्रवृत्तानामाममन्नमगर्हितम्।
भुक्त्वा पक्वान्नमेतेषां त्रिरात्रन्तु पयः पिबेत्॥

अशौचिना सह शयनोपवेशनेनालिङ्गनाङ्गसम्बाहनादिषु कामतः सदैव क्रियमाणेषु अशौचितुल्यमशौचं अकामतः स्नानमेकरात्रञ्च।

कूर्म्मपुराणे—

यस्तैः सहासनं कुर्य्याच्छयनादीनि चैव हि।
बान्धवो वा परो वापि स दशाहेन शुध्यति॥

अदृष्टवृद्धा द्विजदहनवहने सद्यःशौचं घृतप्राशनञ्च।

आदिपुराणे—

अनाथं ब्राह्मणं दीनं दग्ध्वा च धनवर्ज्जितम्।
स्नात्वा संप्राश्य तु घृतं शुध्यन्ति ब्राह्मणादयः॥

पराशरः—

अनाथं ब्राह्मणं दीनं ये वहन्ति द्विजातयः।
पदे पदे फलं तेषां यज्ञतुल्यं न संशयः*॥
जलावगाहनात्तेषां सद्यःशौचं विधीयते॥

यद्युत्कृष्टजातिरपकृष्टजातेः शवस्यापकृष्टजातिर्वा उत्कृष्टजाते-र्धनलोभाद्दहनादिकं करोति तदा प्रेतजात्युक्तमशौचम्।

ब्राह्मणस्य तु शूद्रशवदाहे शूद्रतुल्यमशौचम्। अशौचोत्तरकाले उपवासत्रयञ्च पञ्चगव्यपानं प्रायश्चित्तम्।

आदिपुराणे—

योऽसवर्णन्तु मूल्येन नीत्वा चैव दहेन्नरः।
अशौचन्तु भवेत्तस्य प्रेतजातिसमं तदा॥

तथा—

न ब्राह्मणो दहेच्छूद्रं मित्रं वाप्यन्यमेव वा।
मोहाद्दग्ध्वा ततः स्नात्वा स्पृष्ट्वाग्निं प्राशयेद्घृतम्॥
उपवासरतः पश्चात् त्रिरात्रेण विशुध्यति॥

पश्चात् प्रेतजात्युक्ताशौचात् पश्चादित्यर्थः।

---

* मूलपुस्तके—पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते।

मरीचिः—

शूद्रश्वानुगमने त्रिरात्रं ब्राह्मणे स्मृतम्।
रोदने बान्धवैस्तस्य दाहे च तुल्यमेव च॥

शूद्रबान्धवैः सह रोदने त्रिरात्रमशौचमित्यस्थिसञ्चयनात् पूर्वं बोद्धव्यं वक्ष्यमाणवचनात्।

श्वानुगमने ब्राह्मणस्याशौचमाह—

कूर्मपुराणे—

प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः।
स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्याद्व्यहेन तु।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः॥

यदि प्रमादादपि शूद्रश्वानुगमनं स्यात्तदा सचेलस्नानादिना शुद्धिः।

याज्ञवल्क्यः—

ब्राह्मणेनानुगन्तव्यो न तु शूद्रः कथञ्चन*।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥

शेषार्द्धं प्रमादविषयम्। अम्भसीत्युद्धृतजलस्माननिषेधार्थम्।

स्पर्शं विनानुगमने शूद्रो नक्तेन शुध्यति।

इति वचनात्—

शूद्राणां सजातीयश्वानुगमने एकरात्रम्।

---

* ग पुस्तके—न शूद्रो न द्विजः क्वचित्।

वसिष्ठः—

मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचं अस्निग्धे त्वेकरात्रम्।

एतच्चापकृष्टजातीयास्थिस्पर्शविषयम्।

सजातीयस्य उत्कृष्टजातीयस्य वा स्पर्शे मनुः—

नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति।

आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा॥

अस्थिसञ्चयनाभ्यन्तरे सजातीयप्रेतबान्धवैः सह रोदने सचेलस्नानाच्छुद्धिः। अतः परमाचमनात्।

अस्थिसञ्चयनाभ्यन्तरे शूद्रप्रेतबान्धवैः सह रोदने ब्राह्मणस्य सचेलस्नानात् स्पृश्यत्वमशौचन्तु त्रिरात्रं अस्थिसञ्चयनादूर्द्धं सचेलस्नानञ्च।

क्षत्रविट्शूद्राणान्तु ब्राह्मणप्रेतबान्धवैः सह रोदने अस्थिसञ्चयनाभ्यन्तरे सचेलस्नानं ततःपरं स्नानमात्रमिति।

शूद्रप्रेतस्य तु रोदनरहितविलापमात्रे एकरात्रम्।

आदिपुराणे—

अनस्थिसञ्चिते कश्चित् रौति तद्बान्धवैर्द्विजः।

तस्य स्नानाङ्गवेच्छुद्धिस्ततस्त्वाचमनञ्चरेत्॥

अनस्थिसञ्चये विप्रो रौति चेत् क्षत्रवैश्ययोः।

ततः स्नातः सचेलन्तु द्वितीयेऽहनि शुध्यति॥

अनस्थिसञ्चिते शूद्रे ब्राह्मणो रौति चेज्जड़ः।

ततः स्नातः सचेलन्तु शुध्यते दिवसैस्त्रिभिः॥

अस्थिसञ्चयनादूर्द्धमहोरात्राच्छुचिर्भवेत्।
सचेलस्नानमन्येषामकृतेऽप्यस्थिसञ्चये।
कृते च केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम्॥

पारस्करः—

शूद्रस्य बान्धवैः सार्द्धं कृत्वा तु परिदेवनम्।
वर्ज्जयेत्तदहोरात्रं दानं स्वाध्यायकर्म्म च॥

अथ क्रियाहीनादीनां नित्यमाशुच्यमाह—

दक्षः—

अस्नात्वा चाप्यहुत्वा च *भुङ्क्तेऽदत्वा च यस्तु वै।
एवंविधस्य †विप्रस्य सूतकं समुदाहृतम्॥
व्याधितस्य कदर्य्यस्य ऋणग्रस्तस्य सर्व्वदा।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः।
श्रुताभ्यास‡विहीनस्य भस्मान्तं सूतकं भवेत्॥

कदर्य्यमाह—

आत्मानं धर्म्मकृत्यञ्च पुत्रदारांश्च पीड़यन्।
लोभाद् यः प्रचिनोत्यर्थं स कदर्य्य इति स्मृतः॥

ऋणग्रस्तस्य अपरिशोधितदैवपित्र्यऋणस्य क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः स्त्रीजितस्य स्त्रीवचनाद्गुरुनिर्भर्त्सि-

---

* ग पुस्तके—चाजत्वा।
† ग पुस्तके—सर्व्वस्य।
‡ ग पुस्तके—श्रद्धात्याग।

तस्य व्यसनासक्तस्य द्यूतवेश्यादिप्रसक्तस्य एषां सूतकं भस्मान्तं मरणपर्य्यन्तं भवेदित्यर्थः।

शङ्खः—

हीनवर्णा तु या नारी* प्रमादात् प्रसवं व्रजेत्।
प्रसवे मरणे तज्जमशौचं नोपशाम्यति॥
शूद्रागन्तुरिति शेषः।
पितृवेश्मनि या नारी रजःपश्यत्यसंस्कृता।
†प्रसवे मरणे तज्जमशौचं नोपशाम्यति॥
पितुरेव शेषः।

तथा—

अन्यपूर्व्वा गृहे यस्य भार्य्या स्यात्तस्य नित्यशः।
अशौचं सर्व्वकार्य्येषु गेहे भवति सर्व्वदा॥

गेह इत्यनेन समस्तगृहकर्म्मकरी पत्नी यस्येत्यर्थः।

---

* ग पुस्तके—हीनवर्णा यदा नारी।

† ग पुस्तके—तस्यां मृतायां नाशौचं कदाचिदपि।

अथ सद्यःशौचादिः ।

यज्ञे कर्म्म कुर्व्वतां ऋत्विजां दीक्षितानाञ्च तत्कर्म्मणि नाशौचम् । नित्यान्नदानसत्रप्रवृत्तानामन्नदाने नाशौचं, चान्द्रायणादिव्रतानुष्ठानप्रवृत्तानां तदनुष्ठाने नाशौचं, प्रत्यहं गोहिरण्यादिदानशीलानां तद्दाने नाशौचं, कदाचिद्दानकारिणामपि दानप्रवृत्तानां तद्दाने नाशौचं, विवाहे प्रक्रान्ते वरणे कृते तत्क्रियार्थं नाशौचं यज्ञे दीक्षितान्नभक्षणप्रतिग्रहादौ नाशौचं, संग्रामे युध्यमानानां नाशौचं, परचक्रादिभिर्देशोपप्लवे अत्यन्तदुर्भिक्षे औपसर्गिकात्यन्तमरणपीड़ायाञ्च नाशौचम् ।

यथा याज्ञवल्क्यः—

ऋत्विजां दीक्षितानाञ्च यज्ञे कर्म्मणि कुर्व्वताम्* ।
सत्रि-व्रति-ब्रह्मचारि-दातृ-ब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥

दक्षः—

यज्ञे† प्रवर्त्तमाने तु जायते म्रियतेऽथ वा ।
पूर्व्वसङ्कल्पितार्थेषु न दोषस्तत्र विद्यते ॥

---

* ग पुस्तके—यज्ञियं कर्म्म कुर्व्वताम् ।

† मूलपुस्तके—यज्ञकाले विवाहे च देशभङ्गे—

वर्त्तमाने विवाहे च देवयागे तथैव च।
ह्रयमाने तथाग्नौ च नाशौचं नैव सूतकम्* ॥

पूर्व्वसङ्कल्पितेषु पुष्करिण्यादिधर्म्मकार्य्यं कर्त्तुं पृथक्कृतेषु धनेषु तदर्थमुपयुज्यमानेषु नाशौचम्।

तथा यमः—

पूर्व्वसङ्कल्पितार्थे वा तस्मिन्नाशौचमिष्यते ॥

विष्णुः—

नाशौचं देवप्रतिष्ठाविवाह्ययोः पूर्व्वसम्भृतयोः ॥

पूर्व्वसम्भृतयोरावह्ययोरित्यर्थः।

विवाह्ययज्ञयोरन्यकुलभोजने क्रियमाणे यद्यशौचं स्यात् तदा ऽशौचरहितकुलान्तरद्वारेण शेषान्नपरिवेषणं कारयेदेवं दातुर्भोक्तुश्च न कश्चिद्दोषः।

आदिपुराणे—

विवाह्ययज्ञयोर्मध्ये सूतके सति चान्तरा।
शेषमन्नं परैर्द्दद्यात् दातॄन् भोक्तॄंश्च न स्पृशेत् ॥

दोषो न स्पृशेदित्यर्थः। सन्नग्रासिनां सपिण्डजननमरणे नाशौचम्।

जावालः—

ब्रह्मचारिणि भूपे च यतौ शिल्पिनि दीक्षिते।
यज्ञे विवाहे सत्रे च सूतकं न कदाचन ॥

छन्दोगपरिशिष्टम्—

न त्यजेत् सूतके कर्म्म ब्रह्मचारी स्वकं क्वचित् ॥

---

* ग पुस्तके सूतसूतके।

प्राजापत्यादिकृच्छ्रेषु समस्तेषु नैमित्तिककाम्येषु यागहोमादिषु सम्पूर्णार्थं ब्राह्मणा भोजयितव्या इति गृहीतसङ्कल्पस्यान्यकुलजानां भोजने न दोषः। श्राद्धार्थं वरणे कृते अशौचे सति तत्कर्म्मार्थं निमन्त्रितेषु च विप्रेषु न दोषः।

यथा आदिपुराणे—

निर्वृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने।
गृहीतनियमस्यापि नाशौचं कस्यचिद्भवेत्॥
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि।
निमन्त्रणाद्धि विप्रस्य स्वाध्यायान्निरतस्य च॥
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्॥

क्वचिदपि दातरि भोक्तरि नाशौचमित्यर्थः। दातुः स्वाशौचाज्ञाने भोक्तुश्च ज्ञाने लोभाद्भोजनेऽशौचं दातृतुल्यमन्ते प्रायश्चित्तञ्च।

यथा मिताक्षराधृतषट्त्रिंशन्मुनिवचनम्—

उभाभ्यामपरिज्ञाने सूतकं तु न दोषकृत्॥
एकेनापि परिज्ञाते भोक्तुर्दोषमुपाहरेत्॥

दातुः सूतकं-दातृभोक्तोरेकस्यापि ज्ञाने भोक्तुरेव दोषं वहेत् न दातुरित्यर्थः।

तथा आदिपुराणे—

अपि दातृग्रहीतृभ्यां सूतके मृतकेऽथवा।
अविज्ञाते न दोषः स्यात् श्राद्धादिषु कथञ्चन॥
विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं क्रमात्।

श्राद्धादिषु भोजन इत्यर्थः। भोक्तुरेवेत्युपसंहारात् दातृभोक्तो-

रुभयोरेव दातुरशौचे अविज्ञाते न दोषः उभयोरन्यतरस्य विज्ञाते तु भोक्तुरेव दोषो न तु दातुरित्यर्थः।

एवञ्च तुल्यन्यायात् द्रव्यान्तरप्रतिग्रहेऽपि दातुः स्वाशौचाज्ञाने ग्रहीतुर्ज्ञाने ग्रहीतुरेव दोषः। दातुर्ज्ञाने तु दानविधानाभावः स्थित एव।

एवञ्च—प्रतिग्रहीतुरशौचे उभयोरविज्ञाते न दोषः, दातुरेव विज्ञाने मोहादाने दातुर्दोषः, ग्रहीतुरेव ज्ञाते लोभात् प्रतिग्रहे ग्रहीतुरेव दोष इत्यूह्यम्।

एतेन ज्ञायमानस्यैवाशौचस्य कर्म्मणां फलाजनकता न तु स्वरूपसत इति दर्शितम्।

उभयोरेव विज्ञात इति केषाञ्चिद्व्याख्यानमयुक्तं वचनान्तरप्राप्ताशौचन्नभक्षणदोषमात्रङ्क्रैव वचनप्रवृत्तेरुत्तरार्द्धवैयर्थ्यात् षट्त्रिंशन्मुनिवचनैकवाक्यतावगाच्च।

स्नेहादिना भोजने तु तन्मध्येऽशौचे जाते शेषान्नं त्यक्त्वा परजलाचमनेन शुद्धिः।

आदिपुराणे—

भोजनार्द्धे तु संयुक्ते विप्रैर्दातु र्विपद्यते।
यदा कश्चित्तदोच्छिष्टं शेषं त्यक्त्वा समाहितः॥
आचम्य परकीयेण जलेन शुचयो द्विजाः॥

चन्द्रसूर्य्यग्रहणे स्नानदानश्राद्धादौ रोगाद्यभिभवे शान्तिकर्म्मणि च नाशौचम्।

वामनपुराणे—

नित्यस्य कर्म्मणो हानिः केवलं मृत्युजन्मनोः।
न तु नैमित्तिकोच्छेदः कर्त्तव्यो हि कथञ्चन॥
नैमित्तिकमागन्तुकनिमित्तोपनिपातविहितम्।

यत्तु—

सूतके मृतके चैव न दोषो राहुदर्शने।
स्नानमात्रं प्रकुर्व्वीत दानश्राद्धविवर्ज्जितम्॥

इति नामशून्यवचनं तदमूलमेव।

शिल्पिदासिदासानां स्वकर्म्मणि नाशौचम्।

आदिपुराणे—

शिल्पिनश्चित्रकाराद्याः कर्म्म यत् साधयन्ति ते।
तत्कर्म्म नान्यो जानाति तस्माच्छुद्धः स्वकर्म्मणि॥
दास्यो दासाश्च यत् किञ्चित् कुर्व्वन्त्यपि च लीलया।
तदन्यो न क्षमः कर्त्तुं तेन ते शुचयः स्मृताः॥

मनुः—

राज्ञो माहात्मिके स्थाने सद्यःशौचं विधीयते।
प्रजानां परिरक्षार्थमासनञ्चात्र कारणम्॥

माहात्मिके स्थाने व्यवहारबोधार्थं धर्म्माधिसनाधिरोहेऽशौचाभाव इत्यर्थः।

तथा पराशरः—

कारवः शिल्पिनो दासा वैद्यामात्यास्तथैव च* ।
राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः ॥

वैद्यामात्यराजभृत्यानामपि अन्यस्य तत्कर्म्मकरणासामर्थ्ये बोद्धव्यम्। तथा कार्य्यवशाद् ब्राह्मणानामिच्छयापि अशौचाभावमाह पितामहः—

राज्ञाञ्च सूतकन्नास्ति व्रतिनां सत्रिणां तथा।
दीक्षितानाञ्च सर्व्वेषां यस्य चेच्छन्ति ब्राह्मणाः ॥

मनुः—

उद्यतैराहवे शस्त्रैः क्षत्रधर्म्महतस्य तु।
सद्यः सन्तिष्ठते यज्ञस्तथा शौचमिति स्मृतिः ॥

क्षत्रधर्म्महतस्य अपराङ्मुखहतस्य यज्ञोऽग्निष्टोमादिः संतिष्ठते पुण्येन युज्यते इत्यर्थः।

बृहस्पतिः—

डिम्बाहवे विद्युता च राज्ञा गोविप्रपालने।
सद्यःशौचं हतस्याहुस्त्र्यहं चान्ये महर्षयः ॥

सद्यःशौचं त्र्यहञ्चेति व्यवस्थितविकल्पोऽयम्। डिम्बाहवः स्वामिशून्यानां परस्परं शस्त्रप्रहारः तत्राभिमुखहतस्य सद्यःशौचं पराङ्मुखहतस्य त्रिरात्रं संग्रामेऽपि पराङ्मुखहतस्य त्रिरात्रं कश्यपवचने वक्ष्यते।

---

* ग पुस्तके—नापिताः।

अत्र सद्यःशौचेनाशौचाभाव उच्यते मरणाभिसन्धानेनात्मघातिनामशौचाजनकत्वेन निर्णीतस्य विद्युन्मरणस्य साहचर्य्यात्। तथा वज्रेण मरणं भवत्वित्यभिसन्धाय सज्जीभूय स्थितस्य मरणे सद्यःशौचाभावो दाहाद्यभावश्च। प्रमादहतस्य तु त्रिरात्रम्।

यथा याज्ञवल्क्यः—

महीपतीनां नाशौचं हतानां विद्युता तथा॥

आदिपुराणे—

अशौचं स्यात् त्वग्रहं तेषां वज्रानलहते तथा॥

बधार्हापराधे राज्ञा हतस्य सद्यःशौचमशौचाभावः, अल्पापराधहतस्य च त्रिरात्रम्। गोविप्ररक्षार्थं शस्त्रेण युध्यमानानामभिमुखहतस्य सद्यःशौचमशौचाभावः। पराङ्मुखहतस्य त्रिरात्रं अत्रैव दण्डेन युध्यमानानामभिमुखहतानामेकरात्रम्।

पराशरः—

ब्राह्मणार्थे विपन्नानां दण्डिनां गोग्रहेषु च।
आहवेषु विपन्नानामेकरात्रमशौचकम्॥

अत्र दण्डिनामिति त्रिष्वपि सम्बध्यते। संग्रामेऽपि दण्डेन युध्यमानानां मरणे एकरात्रमिति। प्राणत्यागेनापि परोपकाररूपप्राणसत्रं कर्त्तुमिच्छतां मरणे सद्यःशौचम्*।

---

* ख पुस्तके—इयद्यावत् नास्ति।

यमः—

डिम्बाशनिहतानाञ्च तथैव प्राणसंत्रिणाम्।
नदीस्खापददंष्ट्रिभ्यः सद्यःशौचं विधीयते॥

नद्यादिभ्यो बुद्धिपूर्व्वं मृतानामित्यर्थः। अत्राशनिहतसाहचर्य्यात् सद्यःशौचपदेनाशौचाभाव उच्यते।

अथ सद्यःशौचशब्दार्थो विविच्यते।

तत्र अशौचाभावः स्नानमात्रापनेयाशौचञ्चेति इयमेव मुनिवचनेषु तथैव प्रयोगदर्शनात्। तत्र ऋत्विजां दीक्षितानाञ्चेत्यादि याज्ञवल्क्याद्यनेकमुनिवचनात् शौचभावार्थो दर्शितः, अत्र च उदकादिक्रियापि नास्तीति।

स्नानमात्रापनेयाशौचार्थस्तु *यथा मनुः—

अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति॥

अस्मिन्नेवार्थे शङ्खः—

अतीते सूतके स्वे स्वे त्रिरात्रं स्यादशौचकम्।
संवत्सरे व्यतीते तु सद्यःशौचं विधीयते॥

---

* ख पुस्तके—यमः।

इति विदेशस्थाशौचे दर्शितम्। स्नात्वा शुध्यन्ति गोचजा इति बृहस्पतिवचनञ्च।

अतएव दक्षेणाशौचस्य दशविधत्वमुक्तम्।

यथा—

सद्यःशौचं तथैवाह स्त्रग्रहश्चतुरहस्तथा।
षड्दश द्वादशाहस्तु पक्षो मासस्तथैव च॥
मरणान्तं तथाचान्ये दश पक्षास्तु सूतके॥ इति।

स्नानमात्रापनेयाशौचे सद्यःशौचे तद्दिने स्नानमुदकदानं क्षौरं गृह-वस्त्रशुद्ध्यादिकञ्च कृत्वा परदिने वृषोत्सर्गशय्यादानाद्येकोद्दिष्ट-श्राद्धानि कार्य्याणि न तु तद्दिने।

सूतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने।
धूमोद्गारे तथा वान्ते नित्यकर्म्माण्यपि त्यजेत्॥

इति कालिकापुराणवचनात् क्षौरानन्तरं कर्म्मानधिकारात्। श्वो भूते एकोद्दिष्टं कुर्य्यात् इति हारीतवचनात्।

ऊर्द्धं दशम्या अपरेद्युस्तच्छ्राद्धम् इति वैजवापगृह्यवचनात्।

अशौचान्ताद्द्वितीयेऽह्नि श्रव्यां दद्याद्विलक्षणाम्॥

इत्यादिमत्स्यपुराणवचनाच्च अशौचान्तद्वितीयदिनस्यैव निमित्त-त्वाच्च।

तथाऽशौचव्यपगमे सुस्नात इति विष्णुवचनेऽपि दिनान्तरेऽ-शौचव्यपगमस्य वर्त्तमानत्वेऽपि पूर्व्वोपन्यस्तहारीत-वैजवाप-मत्स्य-पुराणवचनैकवाक्यतयाऽशौचान्तद्वितीयदिनस्यैव निमित्तत्वाव-गमाच्च।

तथाच—

मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा।
भागिनेयसुतानाञ्च सर्व्वेषां चापरेऽहनि॥
श्राद्धं कार्य्यन्तु प्रथमे स्नात्वा कृत्वा जलक्रियाम्॥

इत्यादिपुराणवचनं मित्रापत्यादीनामन्येषामप्यनुक्तानां सर्व्वेषाञ्च सद्यःशौचेऽप्यपरदिने श्राद्धं विदधाति।

व्याख्यातञ्चैतद्वचनं श्राद्धविवेके-अपरेऽहनि यस्य यावदशौचमुक्तं तस्मादपरदिने इत्यर्थः।

वृद्धाश्च पठन्ति—

सद्यःशौचदिने कुर्य्याद्* दशपिण्डान् प्रयत्नतः।
पुत्रादिराचरेच्छ्राद्धमेकोद्दिष्टं परेऽहनि॥ इति।

एतेन सद्यःशौचे तद्दिन एव श्राद्धमित्याधुनिकानां मतं हेयमेवेति विशेषतो दानकौमुद्यां विचारितमस्माभिरिति।
अथ प्रकृतमनुसरामः। बुद्धिपूर्व्वकं नदीशस्त्रादिभिरात्मघातिनां नाशौचं नोदकादिक्रियाश्चाह छागलेयः—

शस्त्रविप्रहतानाञ्च सृङ्निर्दंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्॥

विप्रहतानां ब्राह्मणशापविनष्टानामित्यर्थः।

---

* ख पुस्तके—दद्यात्।

तथा कूर्म्मपुराणे—

ब्रह्मशापहतानाञ्च नाशौचं नोदकक्रिया ॥

शस्त्राग्निजलवज्रादिभिरबुद्धिपूर्व्वकं दैवान्मरणे* त्रिरात्रमशौचं आद्धादिकञ्चाह—

आदिपुराणे—

व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिभिः।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥
अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या च जलक्रिया ॥

ब्रह्मपुराणे—

शृङ्गि-दंष्ट्रि-नखि-व्याल-विष-वह्नि-स्त्रिया जलैः।
आदरात् परिहर्त्तव्यः कुर्व्वन् क्रीड़ां मृतस्तु यः ॥
नागानां विप्रियं कुर्व्वन् दग्धश्चाप्यथ विद्युता।
निगृहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित् ॥

स्त्रिया परस्त्रिया क्रीड़ां कुर्व्वन् परपुरुषेण घातितः आद्धादौ चाशौचे च परिहर्त्तव्य इत्यर्थः।

शास्त्रानुमत्या बुद्धिपूर्व्वमृतानामपि त्र्यहाशौचम् आद्धादिकञ्चाह—

बृद्धगार्ग्यः—

बृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः ॥

---

* ख पुस्तके—त्रिरात्रमिति वक्ष्यते अबुद्धिपूर्व्वमपि वृद्धत्रयादिभिः क्रीड़ां कुर्व्वतां मृतानां नाशौचं नोदकक्रिया। इत्यधिकः पाठः।

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते॥

ज्वलनादिप्रवेशे यदि दैवाज्जीवनं भवेत्तदा पश्चाज्जाविनि मरणेऽपि त्रिरात्रम्।

यथादिपुराणे—

ईदृशं मरणं येषां जीवितञ्चेत् क्वचिद्भवेत्।
अशौचं स्यात् त्र्यहं तेषां ब्रह्मानलहते तथा॥

जीवता-मप्येषामकृत-प्रायश्चित्तानां सर्व्वलोकासंग्रहीतत्वमाह यमः—

जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः।
विष-प्रपतन-प्राय-शस्त्रघात-च्युताश्च ये॥
सर्व्वे ते प्रत्यवसिताः सर्व्वलोकबहिष्कृताः।
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा॥

प्रव्रज्या सन्न्यासः तस्माद्भ्रष्टाः, अनशनं मरणपर्य्यन्तं सङ्कल्पिताहारत्यागः प्रायो महापथगमनम्।

काश्यपः—

अनशनमृतानामशनिहतानां अग्निजलप्रविष्टानां भृगुपातसंग्रामदेशान्तरमृतानां त्रिरात्रेण शुद्धिः।

शास्त्रानुमत्याऽनशनमृतानां अशनिजलाग्निभृगुपात[मृतानां प्रमादादेव] संग्रामे पराङ्मुखमृतानां देशान्तरमृतानामशौचात्परं श्रवणे त्रिरात्रेणेत्यर्थः।

क पुस्तके—[ ] चिह्नितांशो नास्ति।

तथा—

प्रमादादपि निःशङ्क *स्वकस्माद्विधिचोदितः।
शृङ्गि-दंष्ट्रि-नखि-व्याल-विष-विद्युज्जलाग्निभिः॥
चण्डालैरथवा चारैर्निहतो यत्र कुत्रचित्।
तस्याशौचादिकं कार्य्यं यस्मान्न पतितस्तु सः॥

इति ब्रह्मपुराणवचने शृङ्गि दंष्ट्रि नखि व्याल विष विद्युज्जलाग्निभिः प्रमादात्मृतानामशौचस्य कर्त्तव्यत्वमात्रे विहिते—

सिंहव्याघ्रादिभिर्यस्तु हतो मृत्युमवाप्नुयात्।
त्रयहाशौचं भवेत्तस्य सर्व्ववर्णेषु नित्यशः†॥

इति व्यासवचनात्—

अशौचं स्यात् त्रयहं तेषां वज्राग्निलहते तथा।

इत्यादिपुराणवचनाच्च—

प्रमादेन सिंहव्याघ्रादिहतानां विद्युद्धतानाञ्च त्रयहाशौचे निर्णीते जलाग्न्यादिभिः प्रमादमृतानामपि त्रयहाशौचं साहचर्य्येण ब्रह्मपुराणवचनस्य त्रयहाशौचपरत्वादपमृत्युत्वेन तुल्यत्वाच्च। एतेन सङ्कोचे प्रमाणाभावात् जलादिषु प्रमादमृतानां सम्पूर्णाशौचमिति रुद्रधरलिखितमश्रद्धेयम्।

यत्तु—

जातिकालस्य पार्थक्यमपमृत्यौ न विद्यते।
दाहात्परमशौचन्तु कर्त्तव्यं तत्र निश्चितम्॥

---

* ख पुस्तके—तस्माच्च विधिचोदितः।

† ख पुस्तके—सर्व्ववर्णेष्वयं विधिः।

इति पठन्ति तदमूलं समूलत्वेऽपि—

मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना।
दाहादूर्द्ध्वमशौचन्तु यस्य वैतानिको विधिः॥

इति शङ्खवचनैकवाक्यतया साग्नेरपमृत्युविषयं वैतानिकमग्निहोत्रम्। सिंहव्याघ्रादिभिः क्षते क्षते तेनैव क्षतेन सप्तदिनाभ्यन्तरे मरणे त्रिरात्रं ततःपरं सम्पूर्णाशौचम्।

यथा बृहन्मनुः—

क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा।
आसप्ताहात्त्रिरात्रन्तु दशरात्रमतःपरम्।

अथ व्रात्यानामकृतप्रायश्चित्तानां पतितत्वान्नोदकक्रिया। षोड़शद्वाविंशतिचतुर्विंशतिवर्षपर्य्यन्तमकृतोपनयना ब्राह्मणक्षत्रियवैश्या व्रात्याः।

यथा याज्ञवल्क्यः—

आषोड़शाच्च द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥
अत ऊर्द्धं पतन्त्येते यथाकालमसंस्कृताः*।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥

विष्णुः—

आत्मत्यागिनः पतिताश्च नाशौचोदकभागिनः†॥

---

* ग पुस्तके—सर्व्वधर्म्मबहिष्कृताः।

† क पुस्तके—नाशौचा नोदकभागिनः।

याज्ञवल्क्यः—

न ब्रह्मचारिणः कुर्य्युरुदकं पतिता न च* ।
पाषण्डमाश्रिताः स्तेना न व्रात्या न विकर्म्मिणः ॥

आचार्य्यादिव्यतिरिक्तानामेव ब्रह्मचारिणे निषेधः ।

यथा मनुः—

आचार्य्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ।
निर्हृत्यापि व्रती प्रेतं न व्रतेन वियुज्यते ॥

विकर्म्मिणः आलस्यात् त्यक्तनित्यक्रिया इत्यर्थः ।

मनुः—

व्रथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतो*दकक्रिया ।
पाषण्डमाश्रितानाञ्च चरन्तीनाञ्च कामतः ।
गर्भभर्त्तृद्रुहाञ्चैव सुरापीनाञ्च योषिताम् ॥

अपकृष्टवर्णेनोत्कृष्टवर्णस्त्रीषु जाता व्रथासङ्करजाताः ।

जावालः—

दुर्भिक्षे राष्ट्रसम्भ्रांते शस्त्र-गो-ब्रह्म-घातिते ।
पतितेऽनग्नौ प्रेते विदेशस्थे शिशौ न च ॥

सम्मुखयुद्धे शस्त्रेण घातिते गवा ब्राह्मणैश्च घातिते विदेशस्थे संवत्सरात् परं श्रुते शिशावजातदन्ते च नाशौचमित्यर्थः ।

---

* ख पुस्तके—पतितस्य च ।

† क पुस्तके—निर्वर्त्तितो— ।

आदिपुराणे—

परदारान् हरन्तश्च क्रोधात्* तत्पतिभिर्हताः।
असमानैश्च सङ्कीर्णैश्चाण्डालादैश्च विग्रहम्॥
कृत्वा ते निहतास्तांस्तु चण्डालादीन् समाश्रिताः।
गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः॥
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्।
गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः॥
कुशिल्पजीविनः स्तेनाः शूनालङ्कारकारिणः॥
मुखे भगाश्च ये केचित् क्लीवप्राया नपुंसकाः॥
ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः॥
पतितानां न दाहः स्यात् नान्त्येष्टिर्नास्थिसञ्चयः।
नचाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्॥
एतेषां पतितानाञ्च यः करोति विमोहितः।
तमक्कच्छ्रद्वयेनैव तस्य शुद्धिर्नचान्यथा॥

†[स्थावरजङ्गमभेदेन गरविषयोरुक्तिः] क्रूरबुद्धयो नित्यं परापकारिणः, प्रायमनशनं, स्तेनाः चौर्य्यशीलाः, शूना वधस्थानं तदलङ्कारकारिणस्तदधिकृता इत्यर्थः एषां नाशौचꣳमित्यर्थः।

---

* क पुस्तके—द्वेषात्।
† ख पुस्तके [ ] चिह्नितांशो नास्ति।
‡ नोदकक्रियेति कपुस्तकपाठः।

*[गौतमः—

यस्य प्राणान्तिकं प्रायश्चित्तं स मृतः शुध्येत् तस्मिन्नुदकादीनि कर्म्माणि कुर्य्यात्।

अशौचन्त्वत्र विरात्रम्—ह्रस्वः शौचस्मृतेर्लुप्त इत्यादिवचनेन विहितात्मघाते त्रिरात्रदर्शनात्।

पत्या सहमृतानां स्त्रीणामात्मघातित्वेऽपि अशौचादिकमाह]—

यमः—

यदा नारी विशेदग्निं स्वेच्छया स्वामिना सह।
अशौचन्तु भवेत्तस्याः स्वामितुल्यं न संशयः॥
पिण्डदानोदकं तस्याः सह भर्त्रेति निश्चयः।
अशौचमुदकं तस्याः सह भर्त्रा मृतं यतः॥
तिथ्यन्तरमृतायास्तु पृथक् श्राद्धं न विद्यते॥

तथाच पठन्ति—

पत्युर्भिन्नतिथौ साध्वी पत्या सह मृता च या।
तस्यामाद्यादिकं† श्राद्धं पत्युर्मृततिथौ भवेत्॥

अत्र च यदा नारी विशेदग्निं स्वेच्छया पतिना सहेति यमवचनात् पुत्रादिभिः पित्रादिभ्योऽग्नौ दत्ते पश्चाच्चितामारुह्य तदग्निप्रवेशनं कार्य्यं न तु पत्या सह चितामारूढ़ाया एकत्रैवाग्निदानं जीवन्त्या अग्निदानेन पुत्रादीनां मातृवधस्त्रीवधप्रसङ्गादिति।

---

* ख पुस्तके [ ] चिह्नितांशो नास्ति।

† क पुस्तके तस्या माद्यादिकम्।

रजस्वलादिभिस्तु सहमरणं न कार्य्यम्।

यथा बृहस्पतिः—

बालसम्बर्द्धनं त्यक्त्वा बालापत्या न गच्छति।
रजस्वला सूतिका च रक्षेद् गर्भञ्च गर्भिणी॥

तथा बृहन्नारदीयपुराणे—

बालापत्याश्च गर्भिण्यो ह्यदृष्टर्त्तवस्तथा।
रजस्वलाः सूतिकाश्च नारोहन्ति चितां शुभे॥

तथानुगमनमाह व्यासः—

देशान्तरमृते तस्मिन् साध्वी तत्पादुकाद्वयम्।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी।
त्रयहाशौचे निवृत्ते तु श्राद्धमाप्नोति शुद्धवत्॥

साध्वी स्त्रीत्यनेनासाध्वीनामनुगमनं निषिद्धम्*।

अङ्गिराः—

दयितं चान्यदेशस्थं मृतं श्रुत्वा पतिव्रता।
समारोहति दीप्ताग्नौ तस्याः सिद्धिं निबोधत॥
यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः।
व्यालग्राहो यथा व्यालं बलादुद्धरते बिलात्॥

---

* स्वपुस्तके—अनुमरणनिषेधात्।

तद्भर्त्तारमादाय दिवं याति पतिव्रता।
तत्र सा भर्त्तृपरमा स्तूयमानाऽप्सरोगणैः॥
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश॥

ब्राह्मण्या तु सहमरणमेव कार्य्यं नानुगमनम्।

यथा गोतमः—

पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति॥

व्यासः—

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्।
इतरेषान्तु वर्णानां स्त्रीधर्म्मोऽयं व्यवस्थितः॥

भरद्वाजः—

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत्।
सात्मघातेन न स्वर्गमात्मानं वा पतिं नयेत्॥

फलमाह अङ्गिराः—

श्मशानं नीयमानन्तु भर्त्तारमनुयाति या।
पदे पदेऽश्वमेधेन यजते नात्र संशयः॥
तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे।
तावन्त्यब्दानि सा स्वर्गे भर्त्तारं याऽनुगच्छति॥
मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते।
पुनाति त्रिकुलं नारी भर्त्तारं याऽनुगच्छति॥
तत्र सा भर्त्तृपरमा परा परमलालसा।
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश॥

ब्रह्महा वा कृतघ्नो वा मित्रघ्नो वापि यो नरः।
तं वै पुनाति भर्त्तारमित्याङ्गिरसभाषितम्॥

तत्रायं विधिः पुत्रादिभिरग्निदाने कृते ज्वलिते चिताग्नौ स्नात्वाचम्य प्राङ्मुखीभूय सङ्कल्पं कुर्य्यात्—

अद्येत्यादि कुलत्रयोद्धरणपूर्व्वक-भर्त्तृगताशेषपापक्षय-चतुर्दशेन्द्रकालावच्छिन्नपतिसहितस्वर्गलोकवास-कामनया भर्तृसम्बन्धिचिताग्नौ प्रवेशमहं करिष्ये। इति सङ्कल्प्य—अष्टौ लोकपालान् साक्षिणः कृत्वाऽग्निं त्रिःप्रदक्षिणीकृत्य प्रविशेत्।

यत्र च पत्युर्गङ्गामरणादिना वैकुण्ठप्राप्तिः तत्रेदृशं वाक्यम्—अद्येत्यादि गङ्गामरणादिना पतिप्राप्तलोकप्राप्तिकामनया भर्तृसम्बन्धिचिताग्नौ प्रवेक्ष्ये इति।

यथा श्रीभागवते—

सैषा नूनं व्रजत्यूर्द्ध्वमनु वैण्यं पतिं सती।
पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्म्मणा।
स्तुवतीष्वमरस्त्रीषु पत्युर्लोकं गता वधूः॥
यं वै आत्मविदां धूर्य्यो वैण्यः प्रापाच्युताश्रयः।

अथ प्रसङ्गादधिकारिणो निरूप्यन्ते ।

तत्र मरीचिः—

मृते पितरि पुत्रेण क्रियाः कार्य्या विधानतः ।
बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः ॥
सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम् ।
द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत् ॥

पुत्रेणेत्यविशेषात् सर्व्वेषामधिकारः । एकवचनन्त्वविवक्षितं सर्व्वैरेव कृतं भवेदिति वक्ष्यमाणत्वात् ।

प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः ।

इति बृहस्पतिवचनाच्च—

सर्व्वेषां पृथगनुष्ठानप्राप्तावाह बहवः स्युरिति । ज्येष्ठश्चात्र सर्व्वापेक्षया अग्रोत्पन्नो ग्राह्यः तस्यैव पित्रर्णपरिशोधकत्वेन सर्व्वोत्तमत्वात् ।

मनुः—

ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः ।
पितॄणामनृणश्चैव स तस्माल्लब्धुमर्हति ॥

एवम्भूतज्येष्ठाभावेऽप्यपृथगेव श्राद्धं लघुहारीतः—

सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श ।
पृथङ्नैव सुताः कुर्य्युः पृथक्द्रव्या अपि क्वचित् ॥

किन्त्वापेक्षिकज्येष्ठ एव कुर्य्यादिति प्राञ्चः।

कर्त्तुरनियम इति श्राद्धविवेकः।

एकत्रवासिन इत्यनेन प्राप्ते द्रव्येण चाविभक्तेन इति ग्रहणात् विभक्तधनानामपि पुनःकृतसंश्लेषणादविभक्तेन श्राद्धीयद्रव्येणापृथगेव श्राद्धं दर्शितम्।

ततश्च द्रव्यार्पणानुमतिभ्यां ज्येष्ठद्वारा श्राद्धनिष्पादनेन सर्व्वैरेव श्राद्धं कृतं भवेत् प्रत्यवायपरीहारादिफलसिद्धिः* स्यादित्यर्थः।

अत्र पूरकपिण्डदानं पुनर्नावर्तनीयमिति हारलताकारः।

वाचस्पतिमिश्र-विशारदादयस्तु—

पुत्राणां नियताधिकारित्वेनाकरणे प्रत्यवायात्—

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्।
प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत्॥

इति वचनेनैव प्रथमपिण्डदाता दशाहं यावत् समापयेदेवेत्यवगम्यते न त्वन्यो न दद्यादिति तस्यार्थः।

एवञ्च—

प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः।
यन्नान्नवसु चान्येषु स एव प्रददात्यपि॥

इत्यादिपुराणवचने एवकारोऽभिन्नक्रमे सोऽपि दद्यादेवेत्यर्थः अन्यथाऽपिशब्दो व्यर्थः स्यात्।

---

* क पुस्तके—प्रत्यवायपरिहारः स्यात्।

अत्र वसिष्ठमहर्षिणाऽधिष्ठितेन भरतेन दत्ते पूरकपिण्डे श्रीरामेण पुनः पिण्डो दत्त इति रामायणे वाल्मीकिमहर्षिवर्णितं सङ्गच्छते। यथा—

ऐङ्गुदं वदरोन्मिश्रं पिण्याकं दर्भसंस्तरे।
न्युप्य रामः स दुःखार्त इदं वचनमब्रवीत्॥
इदं भुङ्क्ष्व महाराज इङ्गुदीफलसंयुतम्।
यदन्नः पुरुषो राजंस्तदन्नाः पितृदेवताः॥ इति।

अतः पिण्डदानमारभ्य सर्व्वकर्म्म ज्येष्ठेनापि पुनः कार्य्यमिति-समीचिनमित्याहुः।

एवञ्च ज्येष्ठस्याप्यपाटवाद्यशक्तौ देशान्तरस्थितौ वा तदानीमधिकारिणा कनिष्ठेन स्वयमकरणे प्रत्यवायात् कृते श्राद्धे द्रव्यार्पणानुमतिविधानाभावेन प्रत्यवायपरोहारस्याजातत्वात् पाटवादौ भूते पुनर्ज्येष्ठेन कर्त्तव्यमेव।

वृद्धास्तु—चिरकालीनापाटवसम्भावनायां द्रव्यार्पणानुमतौ स्वयं विधाय कनिष्ठद्वारापि कार्य्यम् ततः पश्चात्पाटवे ज्येष्ठेन पुनर्नावर्तनीयमित्याहुः।

एतच्च अपृथगनुष्ठानं सपिण्डीकरणपर्य्यन्तं तत्परन्तु विभक्तानामविभक्तानामपि पृथगेव सांवत्सरिकश्राद्धम्।

यथा व्यासः—

अर्व्वाक् संवत्सरात् ज्येष्ठः श्राद्धं कुर्य्यात्समेत्य च।
ऊर्द्धं सपिण्डीकरणात् सर्व्वे कुर्य्युः पृथक् पृथक्॥

यच्छ्राद्धं ज्येष्ठः समेत्य कुर्य्यात्तन्मृताहसम्बन्धिश्राद्धम् सपिण्डी-

करणात्परं सर्व्वे अविभक्ता* अपि पृथक् कुर्य्युः। अमावस्यादिकन्तु अविभक्तानामपृथगेव विभक्तानान्तु पृथगेव।

यथा बृहस्पतिः—

एकपाकेन वसतां पित्रादेवद्विजार्च्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे॥

तथा च शङ्खः—

अविभक्ता विभक्ता वा कुर्य्युः श्राद्धमदैवतम्।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना॥

अदैवतं सांवत्सरिकश्राद्धं मघाश्राद्धञ्च पृथगेव सर्व्वे कुर्य्युः। ततोऽन्यत्रामावस्यादौ पृथग्भूतं विभक्तं विना सर्व्वेषां नाधिकारः किन्त्वेकस्यैव विभक्तानान्तु पृथगेवेत्यर्थः।

एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम्।

इति लघुहारीतेन स्वयमेव इत्यनेनान्यद्वारा निषेधाच्च।

तथा—

नास्मात् परतरः कालः श्राद्धेष्वन्यत्र वर्त्तते।
यत्र साक्षात्तु पितरो गृह्णन्त्यमृतमुत्तमम्॥

इति ब्रह्मपुराणे साक्षादमृतपदानुवादेन स्वयमनुष्ठानस्यैव युक्तत्वाच्च। श्राद्धचिन्तामणि-निर्णयामृतादीनामप्येवं मतम्। शिष्टाचारोऽपीदृश एव।

श्राद्धविवेके तु सपिण्डनोत्तरसकलश्राद्धानां विभक्तस्य पृथग-

---

* क पुस्तके - विभक्ता इत्यधिकः पाठः।

नुष्ठाननियमः, अविभक्तानामनियमः किन्तु पृथगनुष्ठाने फलातिशय इत्युक्तम्।

ऋष्यशृङ्गः—

पुत्रेषु विद्यमानेषु नान्यं वै कारयेत् स्वधाम्।

अत्राविशेषाद्बहुवचनाच्च द्वादशविधपुत्राणामेवाधिकारः।

तत्र याज्ञवल्क्यः—

औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥
गृहे प्रच्छन्न उत्पन्नो गूढ़जस्तु सुतः स्मृतः।
कानीनः कन्यकाजातो मातामहसुतो मतः॥
अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥
क्रीतस्तु ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयङ्कृतः।
दत्तात्मा तु स्वयंदत्तो गर्भभिन्नः* सहोढ़जः॥
उत्सृष्टो गृह्यते यश्च सोऽपविद्धो भवेत्सुतः।
पिण्डदोऽंशहरश्चैषां पूर्व्वाभावे परः परः॥
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥

धर्म्मपत्न्यां स्वयमुत्पादित औरसः।
विष्णुः-स्वक्षेत्रे स्वयमुत्पादितः प्रथम इति।

---

* क पुस्तके—गर्भविद्धः।

अत्र परिणीतक्षत्रियावैश्याशूद्राणामौरसत्वेऽपि नाधिकारः—

सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः।

इत्युपसंहारव्यावर्त्तनात्। अतएव आदिपुराणेऽधिकारि-प्रकरणे सपिण्डाद्यभावे अत्यन्तापत्तरुपस्तेषामधिकार उक्तः। यथा—

ब्राह्मणस्त्वन्यवर्णानां न करोति कदाचन।
कामाल्लोभाद्भयान्मोहात् कृत्वा तज्जातितां व्रजेत्॥
पुत्राः कुर्व्वन्ति विप्राय क्षत्रविट् शूद्रयोनयः।
स तादृशेभ्यः पुत्रेभ्यो न करोति कथञ्चन॥

तत्सम इति—

अस्यां यो जायते पुत्रः स मे पुत्रो भवेत्।

इतिवाचाऽभिसन्धिना वा नियम्य या दत्ता सा पुत्रिका तत्सुत औरससम इत्यर्थः। अत्र पुत्रिकाभावे तत्सुत इति बोद्धव्यम्।

बृहस्पतिः—

आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम्।
तथैकादशपुत्राश्च पुत्रिकौरसयोर्विना॥

गुर्व्वाज्ञया यस्य क्षेत्रे जनितः स तस्य क्षेत्रजः। मातामहसुत इति वोढुरपि पुत्रान्तरासत्त्वे स एव पुत्रः।

ब्रह्मपुराणे—

अदत्तायान्तु यो जातः सवर्णेन पितुर्गृहे।
स कानीनः सुतस्तस्य यस्य सा दीयते पुनः॥

अक्षतायां क्षतयोन्यां वा पुनरूढ़ायां जातः पौनर्भवो जनकपुत्रः। ताभ्यां मातापितृभ्यां पुत्रार्थं विक्रीतः। यथा मनुः—

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्।

दत्तात्मेति मनुः—

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।
आत्मानं संस्पृशेद्यस्मै स्वयंदत्तः स उच्यते॥

गर्भेण सहोढ़ा या तद्गर्भजातः सहोढ़जः। एषां सजातीयानामेव पुत्राणां साक्षादधिकार एव क्रमः। द्रव्यानुमतिद्वारा तु सर्व्वेषां युगपदधिकारोऽस्त्येव बृहस्पतिवचने ऋष्यशृङ्गवचने च पुत्रत्वाविशेषेण प्रतिपादनात् बहुवचनाच्च।

यत्तु—

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।

इत्यादिनारदवचनं तद्गणनमात्रपरं न तु क्रमपरम्। एषामभावे पौत्र-प्रपौत्रयोः क्रमेणाधिकारः "पुत्रः पौत्रः-प्रपौत्रो वा" इति वक्ष्यमाणविष्णुपुराणवचनात् धनहारित्वाच्च।

तदभावे पत्न्यधिकारमाह शङ्खः—

पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे च पत्नी स्यात्तदभावे सहोदरः॥

पत्न्योः सद्भावे अपुत्राया एव अधिकारः।

यथा व्यासः—

अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि।
दद्यात्पिण्डं जलञ्चैव जलमाचन्तु पुत्रिणी॥

तदभावे सहोदर इत्यत्र दुहित्रभावेऽपीति बोद्धव्यम् पत्नी दुहितरश्चैवेति याज्ञवल्क्येन पत्न्यनन्तरं धनाधिकारप्रतिपादनात्तस्य चोपकारकत्वव्याप्यत्वात् पिण्डदानादिकञ्चोपकारः।

मनुः—

अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणाम्।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो हरेद्धनम्॥

भरद्वाजः—

दुहिता पुत्रवत्कुर्य्यान्मातापित्रोस्तु संस्कृता।

अत्र चादत्तायाः सगोत्रत्वात्तदभावे दत्ताऽधिकारिणीति।

कश्चित्-दुहित्रनन्तरं दौहित्राधिकारः पार्वणपिण्डदातृत्वेन भ्रातृतो बलवत्त्वादित्याह। तन्न—

पुत्राभावे सपिण्डास्तु तदभावे सहोदकाः।
कुर्य्युरेतं विधिं स्वस्य पुत्रस्यापि सुतासुताः॥

इति ब्रह्मपुराणे पुत्रस्याप्यात्मनश्च सुतायाः सुता दौहित्रा एतं दाहादिकं विधिं कुर्य्युरिति समानोदकाभाव एव दौहित्राधिकारप्रतिपादनात् गोत्ररिक्थानुगः पिण्ड इति मनुवचनात् संशये गोत्रस्यैव पिण्डदानप्रयोजकत्वावगमाच्च।

*श्राद्धचिन्तामणौ च सकुल्याभाव एव दौहित्राधिकारःपार्व्वणपिण्डदानस्य पत्नीदुहितृवदकिञ्चित्करत्वेन सकुल्यतया सम्बन्धोत्कर्षादित्युक्तम्।

---

* ग पुस्तके—श्राद्धचिन्तामणिमतं नास्ति।

श्राद्धविवेकेऽपि—

मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे।
तेऽपि तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा॥

इत्यादिपुराणवचनेन मातामहाधिकारतुल्यतया प्रतिपादनात् सकुल्याभावे दौहित्राधिकारो व्यक्तीकृत इति। नानुजस्य तथा-यज इति छन्दोगपरिशिष्टवचनं कनिष्ठभ्रातृसङ्गावविषयम्।

आदिपुराणे—

भ्रातुर्भ्राता स्वयञ्चक्रे तद्भार्य्या चेन्न विद्यते।
तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः॥

अत्र सहोदराभावे तत्सुताधिकारकथनात्तदभाव एव सपत्नभ्रातृ-तत्पुत्रयोः क्रमेणाधिकारस्तयोरपि भ्रातृभ्रातृपुत्रशब्दार्थत्वात्। भ्रातृपुत्राभावे पिता-पुत्रो भ्राता पिता वापीति प्रचेतोवचनात्। तुल्यन्यायान्मातापि। सर्व्वाः पितृपत्न्यो मातर इति स्मरणा-द्विमातापि। न पुत्रस्य पिता कुर्य्यात् इति परिशिष्टवचनं पत्न्यादिसङ्गावविषयम्। ततः पितृतुल्यन्यायात् पितामहः। ततः स्नुषा 'श्वश्वादेस्तु स्नुषा चैव' इति शङ्खवचनात्। तदभावे सम्बन्धसन्निकर्षमपेक्ष्य सपिण्डास्तदभावे समानोदकास्तदभावे दौहित्रा इति प्रागुक्तं तदभावे मातृसपिण्डाः।

यथा गोतमः—

पुत्राभावे सपिण्डाः समानोदकाश्च मातृसपिण्डा वा शिष्या वा तदभावे ऋत्विगाचार्य्यौ।

अत्र मातृसपिण्डेष्वपि सम्बन्धसन्निर्षोऽपेक्षणीयः प्रथमो

मातामहः ततो मातुलः ततोऽन्ये मातृसपिण्डास्तदभावे मातृसमानोदका वक्ष्यमाणाः। [*ततो जामातृश्वशुरयोः परस्परम्। आदिपुराणे—

जामातुः श्वशुराः कुर्य्युस्तेषां तेऽपि च संयताः।]

मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा।

भागिनेयसुतानाञ्च सर्व्वेषान्त्वपरेऽहनि॥

अपरेऽहनि इति यस्य यावदशौचन्तस्य द्वितीयदिने श्राद्धं कार्य्यमित्यर्थः। स्त्रियास्तु पुत्र-पौत्र-प्रपौत्राभावे कन्या—

दुहिता पुत्रवत् कुर्य्यान्मातापित्रोस्तु संस्कृता।

इति भरद्वाजवचनात् धनग्रहणाधिकाराच्च। तदभावे सपत्नीपुत्रस्तस्यापि पुत्रत्वस्मरणात्।

यथा यमः—

बह्वीनामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।

सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥

अत्र तेन पुत्रेणेत्यनेनैतदर्थमेव तस्य पुत्रत्वं-पुत्रवतीरित्यनेन तु सपिण्डनार्थं तस्याः पुत्रिणीत्वञ्चातिदिश्यते। तदभावे पतिस्तदभावे स्नुषा।

शङ्खः—

भार्य्यापिण्डं पतिः कुर्य्यात् भर्त्रे भार्य्या तथैव च।

श्वश्वादेश्च स्नुषा चैव तदभावे द्विजोत्तमः॥

---

* ख पुस्तके—[ ] चिह्नितांशः पतितः।

आदिग्रहणात् श्वशुरस्य च।

न भार्य्यायाः पतिर्दद्या*दिति कात्यायनवचनं दुहितृ-सपत्नी-पुत्रसङ्गावविषयम्। स्नुषाभावे पुंवत्सपिण्डसमानोदकादयः। सर्व्वाभावे द्विजोत्तमः क्रपया कुर्य्यात्। एतच्च सजातीयविषयम्। आदिपुराणे—

ब्राह्मणस्त्वन्यवर्णानां न करोति कदाचन।
कामाल्लोभाद्भयान्मोहात् कृत्वा तज्जातितामियात्† ॥
पुत्राः कुर्व्वन्ति विप्राय क्षत्रविट्शूद्रयोनयः।
स ताद्दृग्भ्यः पुत्रेभ्यो न करोति कदाचन ॥
स्वमाता कुरुते तेषां तेऽपि तस्याश्च कुर्व्वते ॥

विष्णुपुराणे—

पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसन्ततिः।
सपिण्डसन्ततिर्वापि क्रियार्हा नृप जायते ॥
एषामभावे सर्व्वेषां समानोदकसन्ततिः।
मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा ॥
कुलद्वयेऽपि चोत्पन्ने स्त्रीभिः कार्य्या क्रिया नृप।
संघातान्तर्गतैर्वापि कार्य्या प्रेतस्य वा क्रिया ॥
उत्पन्नबन्धुरिक्थाद्वा कारयेदवनीपतिः।
पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ॥

---

* ख पुस्तके—कुर्य्यात्।

† क पुस्तके—व्रजेत्।

Pariçişta Parvan, (Text) Fasc. 1--5 @ /6/ each	Rs.	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /6/ each		2	10
Prithivirāj Rāsa. (Text) Part II, Fasc. 1--5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1--3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5--10 ; II, 1--6 ; III, 1--7 ; IV, 1--6 ; V, 1--8, @ /6/ each Fasc.		12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1--4 @ /6/ each		1	8
Ditto (English) Fasc. 1--3 @ /12/ each		2	4
Suddhikaumudī, (Text) Fasc 1 @		6	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/ each		0	12
Sraddha kriyā kaumudī, Fasc. 1-5 @ /6/		1	14
*Taittereya Saṁhitā, (Text) Fasc. 14--45 @ /6/ each		1	2
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1--19 @ /6/ each		7	2
Tantravarteka (English) Fasc. 1		0	12
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1--9, Vol II, Fasc. 1--10, Vol. III, Fasc. 1--2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1--12 @ /6/ each		14	10
Tattvarthadhigama Sutram Fasc. 1-2		0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/		1	2
Tul'si Sat'sai, (Text) Fasc. 1--5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...		2	4
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ /12/		4	8
Vallāla Caritam Fasc 1-- Text only)		0	8
Varāha Purāṇa, (Text) Fasc. 1--14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc 1--5 @ /6/ each		1	14
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /6/ each		4	8
Vidhan Parijata, Fasc. 1-5		1	14
Viṣṇu Smṛti, (Text) Fasc 1--2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1--7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1--6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1--6		2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1--4 @ 1/ each		4	0
Sher-Phyiñ, Vol. I, Fasc. 1--5 ; Vol. II, Fasc. 1--3 ; Vol. III, Fasc. 1--5, @ 1/ each		13	0
Rtogs *brjod dpag bkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1--5 ; Vol. II. Fasc. 1--5 @ 1/ each		10	0

Arabic and Persian Series.

Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /6/ each		4	14
Al-Muqaddasi (English) Vol. I, Fasc 1--3 @ /12/		2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III, Fasc. 1--5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1--37 @ 1/ each		37	0
Ditto (English) Fasc. 1--8 @ Vol. II, Fasc. I-1/ each ...		9	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1--19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1--21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each...		14	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1--4 @ /12/ each		3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1--9 @ /6/ each		3	6
Ditto of Āzādi, (Text) Fasc. 1--4 @ /6/ each		1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1--6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1--3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. III, Fasc. 11-12 ; Index to Vol. II, Fasc. 10-12 @ /6/ each		13	2
Maghāzi of Wāqidī, (Text) Fasc. 1--5 @ /6/ each		1	14

*The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1--15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and Index ; Vol. III, Fasc 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1- 19 @ /6/ each ...		7	2
Ma'āṣir-i-' Ālamgīrī, (Text), Fasc. 1--6 @ /6/ each ...		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1 ...		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1--2 @ /12/ each ...		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1--5 @ /6/ each ...		1	14
Ditto (English) Fasc. 1--3 ..		2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1--5 @ /6/ each ...		1	14
Ditto (English) Fasc. 1--14 @ /12/ each ...		10	8
Ditto Index ...		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1--7 @ /6/ each ...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1--6 @ /6/ each ...		2	4
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...		3	0
Wis-o-Rāmīn, (Text) Fasc. 1--5 @ /6/ each ...		1	14
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /6/ each ...		6	6
Tuzuk-i-Jahāngirī, (Eng) Fasc. 1 ...		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each ...	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Assiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1170 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7 . 1880 (8) 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ...	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) ...	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ...	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) ...	4	0
5.	Anīs-ul-Musharrahīn ...	3	0
6.	Catalogue of Fossil Vertebrata ...	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II, and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm ...	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each ...	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ...	18	0
13.	Sharaya-ool-Islām ...	4	0
14.	Tibetan Dictionary, by Csoma de Körös ...	10	0
15.	Ditto Grammar ,, ,, ...	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ ...	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson ...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kasmir by M. A. Stein Ph.D., JI. Extra No. 2 of 1899 ...	4	0

Notices of Sanskrit Manuscripts, Fasc. 1--29 @ 1/ each ...	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

7-9-04.

Books are supplied by V.P.P